भारतमञ्जरी/भीष्मपर्व

< भारतमञ्जरी

भीष्मपर्व

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ६.१ ॥

आसूर्यकिरणाक्रान्ताज्जगतो जनगोचरात् ।

पुण्यधाम्नि कुरुक्षेत्रे समायातेषु राजसु ॥ ६.२ ॥

एकीभूतेषु सैन्येषु कुरुपाण्डवसंगरे ।

वृद्धबालावशेषासु दिक्षु यातासु शून्यताम् ॥ ६.३ ॥

दारुणेषु निमित्तेषु प्रादुर्भूतेषु सर्वतः ।

मिथो दृष्टिपथं याते पताकाभिर्बलद्वये ॥ ६.४ ॥

सोत्साहं दध्मतुः शङ्खं हृषीकेशधनंजयौ ।

ययोर्गम्भीरघोषेण भुवनानि चकम्पिरे ॥ ६.५ ॥

विषमस्थो न हन्तव्यो न च सेनाविनिर्गतः ।

न निवृत्ते रणे चेति मर्यादां चक्रिरे नृपाः ॥ ६.६ ॥

अत्रान्तरे समभ्येत्य पाराशर्यो मुनीश्वरः ।

विषण्णं मन्दिरगतं धृतराष्ट्रमभाषत ॥ ६.७ ॥

वीराणां भूमिपालानामशेषेऽस्मिन्समागमे ।

क्षत्त्रस्य संक्षयो राजन्विषमः समुपस्थितः ॥ ६.८ ॥

दिव्यं गृहाम नयनं स्वयं युद्धं विलोकय ।

इत्युक्ते मुनिना राजा जगादाकुलिताशयः ॥ ६.९ ॥

भगवान्बन्धुनिधनं नाहं द्रष्टुं समुत्सहे ।

भाव्यस्यावश्यभावित्वान्न च वारयितुं क्षमः ॥ ६.१० ॥

इत्युक्तवति भूपाले संजयं वरदो मुनिः ।

विधाय दिव्यनयनं पुनः क्षितिपमभ्यधात् ॥ ६.११ ॥

अयं ते निखिलं युद्धं कथयिष्यति संजयः ।

नास्य किंचिदविज्ञातं दिव्यदृष्टेर्भविष्यति ॥ ६.१२ ॥

कृतान्तो जृम्भते राज्ञां धृतराष्ट्र तवानयात् ।

दृश्यन्ते दुर्निमित्तानि क्षयकर्णेजपानि यत् ॥ ६.१३ ॥

सौरेण पीडिता गाढं रोहिणी ज्वलिता दिशः ।

विपरीता प्रसूतिश्च कबन्धेनावृतो रविः ॥ ६.१४ ॥

क्रव्यादैरावृतं व्योम मेघा वर्षन्ति शोणितम् ।

किमन्यद्राजमहिषी हा मही न भविष्यति ॥ ६.१५ ॥

प्रदक्षिणशिखो वह्निः प्रसादो मनसस्तथा ।

लक्षव्यक्तं जयस्यैतद्धर्मो यत्रास्ति तत्र सः ॥ ६.१६ ॥

शतान्येकेन जीयन्ते नैको जेयः शतैरपि ।

तरला ह्यसिधारेयं निश्चयो नात्र गण्यते ॥ ६.१७ ॥

इत्युक्त्वान्तर्हिते क्षिप्रं मुनीन्द्रे संजयं नृपः ।

पप्रच्छ द्वीपसंस्थानं स च पृष्ठोऽभ्यभाषत ॥ ६.१८ ॥

राजन्विशाले शीतांशोर्मण्डले दर्पणाकृतौ ।

स्फारं सुदर्शनं द्वीपं निखिलं प्रतिबिम्बितम् ॥ ६.१९ ॥

एकतः पिप्पलाच्छायमन्यतः शशकाकृति ।

द्वीपेऽस्मिन्मण्लाकारे लवणाम्बुधिवेष्टिते ।

कर्णिकेवाम्बुजे प्रांशुर्मध्ये कनकपर्वतः ॥ ६.२० ॥

शयाना भृधराश्चान्ये पार्श्वयोस्तस्य भूभृतः ।

स्थिता हिमालयमुखाः स्पृशन्तः पूर्वपश्चिमम् ॥ ६.२१ ॥

हिमवान्हेमकूटश्च निषदश्चेति दक्षिणे ।

उत्तरे शृङ्गवान्नीलः श्वेतश्चेति महाबलाः ॥ ६.२२ ॥

एषां रत्नविचत्राणामन्तरे वर्षभूमयः ।

कर्मभूर्भारतं वर्षमन्याश्च फलभूमयः ॥ ६.२३ ॥

हरिवर्षमुखेष्वेव प्रजासर्गः स्मरोपमः ।

स्थानं सुकृतिनां यत्र विख्याता गण्डिका इति ॥ ६.२४ ॥

जम्बूखण्डं तथा मेरोरधो यत्फलविस्रुता ।

जाता जम्बूनदी शुभ्रा जाम्बुनदविधायिनी ॥ ६.२५ ॥

उत्तराः कुरवः पीत्वा तामेव गतमृत्यवः ।

दिवस्पृशस्तरेस्तस्य नाम्नेदं द्वीपमुच्यते ॥ ६.२६ ॥

इत्युक्त्वा संजयो गत्वा कुरुक्षेत्रे राणाङ्गणे ।

समेत्य धृतराष्ट्राय शशंय स्वभटक्षयम् ॥ ६.२७ ॥

■ ■ ■ ■ ■ जम्बूखण्डनिर्माणम् ॥ १ ॥ *****

शृणु राजन्हतानन्तसामन्तः शन्तनोः सुतः ।

विदधे पाण्डुपुत्राणां यथा विजयसंशयम् ॥ ६.२८ ॥

वज्रसूचीमुखाख्याभ्यां प्यूहाभ्यां राजकुञ्जरैः

मिथो व्यूढेष्वनीकेषु गाङ्गेयेनार्जुनेन च ॥ ६.२९ ॥

तस्मिन्क्षत्त्रक्षयक्षेत्रे सर्वक्षत्त्रसमागमे ।

दुर्योधनेऽतिसंरब्धे पृथुसैन्याभिमानिनि ॥ ६.३० ॥

गाङ्गेयशङ्खनादेन समुद्धूते बलार्णवे ।

शङ्खशब्देन पार्थानां पाञ्चजन्यानुयायिना ॥ ६.३१ ॥

पूरिते भुवनाभोगे दिक्षु विस्फूर्जितास्विव ।

सर्वसेनाश्रयः श्रीमान्विजयोऽच्युतसारथिः ॥ ६.३२ ॥

ददर्श कुरुसेनासु गुरुसंबन्धिबान्धवान् ।

निजप्रतापदहने स तेषां शलभायितम् ।

मत्वा जगाद गोविन्दं विषण्णः करुणानिधिः ॥ ६.३३ ॥

अहो वत विमूढानां राज्यलेशे सुखाय नः ।

कृष्ण बन्धुवधेऽप्यस्मिन्ससंरम्भोऽयमुद्यमः ॥ ६.३४ ॥

अवतीर्य सदाचारस्तुतिक्रम्यकुलस्थितिम् ।

कथं गुरुवधप्राप्यां भजेदस्मद्विधश्च श्रियम् ॥ ६.३५ ॥

इत्युक्त्वा सास्रुनयनो बीभत्सुः कृपया रथे ।

करादुत्सृज्य गाण्डीवं निषसाद विषादवान् ॥ ६.३६ ॥

■ ■ ■ ■ ■ श्रीमद्भगवद्गीतासु प्रथमोऽध्यायः ॥ २ ॥ *****

तं दृष्ट्वा शोकविवशं जगाद मधुसूदनः ।

अकाण्डे धैर्यसारस्य केयं कातरता तव ॥ ६.३७ ॥

तरस्वी क्षत्रियो मानी प्राणैरपि यशःक्रयी ।

निजां कुलस्थितिं पार्थ न धर्म्यां हातुमर्हसि ॥ ६.३८ ॥

संयुक्तं वा वियुक्तं वा नित्यं देहेन देहिनम् ।

विश्वमायाप्रपञ्चेऽस्मन्कोऽनुशोचति तत्त्वधीः ॥ ६.३९ ॥

सुखाद्यवस्था देहस्य काले काले यथाविधाः ।

देहिनोऽस्य तथा देहाः सतः सत्ताविवर्जिताः ॥ ६.४० ॥

विषयेन्द्रियसंयोगान्क्षयिनो हर्षशोकदान् ।

सहते यो विलुप्तात्मा निर्वाणं तस्य शाश्वतम् ॥ ६.४१ ॥

अजस्य पुराणस्य देहिनोऽस्याविनाशिनः ।

जीर्णपर्णपरावृत्तितुल्येयं देहकल्पना ॥ ६.४२ ॥

आदिमध्यावसानेषु व्यक्ताव्यक्तस्वरूपिणः ।

सत एवास्य सततं न विरामः शरीरिणः ॥ ६.४३ ॥

अयशस्यमतस्त्यक्त्वा संकोचं विपुलाशयः ।

जयाजयौ समं मत्वा विश स्वर्गोन्मुखो रणम् ॥ ६.४४ ॥

आस्थाय यौगिकीं बुद्धिं कर्मबन्धविवर्जितः ।

शुष्कवेदक्रियाहीनं गुणातीतं पदं भुज ॥ ६.४५ ॥

सर्ववेदेषु विदुषामेतदेव प्रयोजनम् ।

जलाशयेषु पूर्णेषु यथा सलिलहारिणाम् ॥ ६.४६ ॥

निःसङ्गः फलसंन्यासी कुरु कर्म सदोदितः ।

परमेश्वरमेवाहि(?)वाणिज्यं हि फलार्थिनाम् ॥ ६.४७ ॥

यदा ते वीतमोहस्य बुद्धिर्यास्यति निर्वृतिम् ।

कृती भविष्यसि तदा श्रुतेष्वर्थेष्वनादरः ॥ ६.४८ ॥

इति ब्रुवाणः पार्थेन स्थितप्रज्ञस्य लक्षणम् ।

पृष्टः समाधिसक्तस्य भगवानित्यभाषत ॥ ६.४९ ॥

ईश्वरादपरो नाहमिति स्वानन्दनिर्भरः ।

निरस्ताखिलसंकल्पः स्थितप्रज्ञोऽभिधीयते ॥ ६.५० ॥

आस्ते कूर्म इवाङ्गानि कामान्संवृत्ययः श्रयम् ।

विषयाध्यानविरहात्स्थितधीर्न स नश्यति ॥ ६.५१ ॥

कष्टैस्तपोभिर्विषयाः शुष्यन्त्येव रसं विना ।

अनादरविरक्तानां सदाप्यध्यात्मदर्शिनाम् ॥ ६.५२ ॥

निद्रालुर्भूतकालेषु प्रबुद्धिस्तिमिरेषु यः ।

स महाब्धिरिवाक्षोभ्यः स्थितिं ब्राह्मीं प्रपद्यते ॥ ६.५३ ॥

▪ ▪ ▪ ▪ ▪ श्रीगीतासु द्वितीयोऽध्यायः ॥ ३ ॥ *****

श्रुत्वैतदर्जुनः कृष्णमुवाचाकुलिताशयः ।

कथमेवं वदन्घोरे समरेऽस्मिन्युनक्षि माम् ॥ ६.५४ ॥

कर्मणः श्रेयसी बुद्धिरित्युक्त्वापि स्वयं विभो ।

कर्म दुर्मतियोग्यं मां प्रशंससि विमोहयन् ॥ ६.५५ ॥

श्रेयो वदेत्युक्तवति श्वेताश्वे केशवोऽब्रवीत् ।

निष्ठा प्रज्ञानकर्मभ्यां मयोक्ता सांख्ययोगयोः ॥ ६.५६ ॥

अनारम्भान्न च त्यागात्कर्मणो मुच्यते जनः ।

श्रोत्रादयो बलादस्य धावन्त्येव स्वकर्मसु ॥ ६.५७ ॥

स्मरन्ति मनसा सर्वं रुद्धकर्मेन्द्रिया अपि ।

मिथ्याचारानत्वसक्ताः(?)कर्मिणो नियतान्तराः ॥ ६.५८ ॥

श्रेयो ह्यकर्मणः कर्म न यज्ञः कर्मणा विना ।

यज्ञशेषाशिनः पुण्यद्रुमाः केवलभोगिनः ॥ ६.५९ ॥

कर्मस्थितोऽपि निःसंज्ञो(सङ्गो) यदा प्राप्नोति मानवः ।

आत्मारामदशास्तुष्टस्तदा कार्यान्निवर्तते ॥ ६.६० ॥

कर्मणैव गताः सिद्धिं जनकप्रमुखाः पुरा ।

तन्मा कार्यान्निवर्तस्व लोकस्त्वामनुवर्तताम् ॥ ६.६१ ॥

ममापि कृतकृत्यस्य कर्मेदं स्थितिरक्षिणः ।

विनस्यत्यन्यथा लोको मत्प्रमाणविशृङ्खलः ॥ ६.६२ ॥

पात्रं सर्वज्ञयोग्येषु नादरेषु पृथग्जनः ।

तस्मान्नोत्साहयेदेतान्पङ्गून्वेगगतानिव ॥ ६.६३ ॥

युध्यस्व सर्वकर्माणि मयि संन्यस्य निर्वृतः ।

तरन्ति हि तमो घोरं नित्यं मन्मतवर्तिनः ॥ ६.६४ ॥

प्रकृतेरुचितं सर्वं स्वधर्मनिरतः कुरु ।

रागद्वेषौ परित्यज्य प्रियाप्रियसमुद्भवौ ॥ ६.६५ ॥

श्रुत्वैतदर्जुनोऽवादीत्प्रेरितः केन पातकम् ।

चरत्यनीश्वरः प्राणी बलादिव वशीकृतः ॥ ६.६६ ॥

इति पृष्टो हृषीकेशो जगाद जगतां पतिः ।

रजोगुणसमुत्थेन हर्षशोकादिदायिना ॥ ६.६७ ॥

लोकसंहारशीलेन कामेन क्रोधबन्धुना ।

अहंकारेण बलिना घोरेणानेन वैरिणा ॥ ६.६८ ॥

शेवालेनैव सलिलं रजसेवामलं नभः ।

आवृतो मलिनोनात्मा मेघेनैवोदितो रविः ॥ ६.६९ ॥

मनोबुद्धिसमायुक्तं स्थानमिन्द्रियपञ्जरम् ।

यस्य तं दुःसहं शत्रुं कामरूप विनाशय ॥ ६.७० ॥

▪ ▪ ▪ ▪ ▪ श्रीगीतासु तृतीयोऽध्यायः ॥ ४ ॥ *****

सूर्येणाप्तः पुरा मत्तो योगोऽयं मनुना ततः ।

य एव कालेनोत्सन्नस्तुभ्यमद्य मयोदितः ॥ ६.७१ ॥

अनेकजन्मसाक्षी त्वं भक्तः सहचरोऽपि मे ।

न तत्स्मृतिपथं यातं किंतु ते प्राक्तनं वपुः ॥ ६.७२ ॥

अहं तु नित्यधरमस्य स्थितये गुप्तये सताम् ।

युगे युगे भवाम्येष विनाशाय दुरात्मनाम् ॥ ६.७३ ॥

अकृतं धर्मकर्तारं कर्मैतन्नावृणोति माम् ।

त्वमप्यसक्तो निष्कामः कुरु कर्म कुलोचितम् ॥ ६.७४ ॥

दुर्ज्ञेयः प्रविभागस्तु कर्माकर्मविकर्मणाम् ।

स्वोचितं फलहीनं च विरुद्धं चेति भेदतः ॥ ६.७५ ॥

कर्मणः फलसंन्यासाद्योऽनुपश्यत्यकर्मताम् ।

जानात्यकर्मणः पापात्कर्म यश्च स बुद्धिमान् ॥ ६.७६ ॥

ज्ञानाग्निना दग्धकर्मा नित्यानन्दो निराश्रयः ।

निराशीर्निरहंकारो यज्वा ब्रह्मणि लीयते ॥ ६.७७ ॥

ब्रह्मार्पणेन ब्रह्माग्नौ हुत्वा ब्रह्ममयं हविः ।

प्राणयज्ञरतो याति ब्रह्म ब्रह्मसमाधिना ॥ ६.७८ ॥

संयमाग्नाविन्द्रियाणि विषयानिन्द्रियानले ।

तत्कर्माण्यात्मयोगाग्नौ हुत्वा यान्ति परां गतिम् ॥ ६.७९ ॥

येऽपि द्रव्यतपोयोगस्वाध्यायज्ञानयाजिनः ।

प्राणापानादिह विषो धृत्वा नाडीषु धारणम् ॥ ६.८० ॥

समर्पयन्ति निखिलं ज्ञानं विगतकल्मषाः ।

ते प्रयान्ति परं धाम यज्ञशिष्टामृताशिनः ॥ ६.८१ ॥

तद्विधाः प्रणिपातेन सेविता ज्ञानिनस्त्वया ।

अयत्नात्त्वां विधास्यन्ति स्वात्मन्यखिलदर्शिनम् ॥ ६.८२ ॥

ज्ञानाग्निना दग्धपापः पवित्रेण भविष्यसि ।

कालेन श्रद्दधानानां स्वयं ज्ञानं प्रसीदति ॥ ६.८३ ॥

नश्यन्ति संशयजुषो मूढा न त्वस्तसंशयाः ।

ज्ञानिनः संशयं त्वस्मात्स्थित्वोत्तिष्ठ विभूतये ॥ ६.८४ ॥

▪ ▪ ▪ ▪ ▪ श्रीगीतासु चतुर्थोऽध्यायः ॥ ५ ॥ *****

निशम्य तत्पुनः पार्थः पप्रच्छ मधुसूदनम् ।

संन्यासकर्मयोगाभ्यां श्रेयो ब्रूहि जनार्दन ॥ ६.८५ ॥

इति पृष्टोऽवदच्छौरिरुभावेतौ विमुक्तये ।

कर्मयोगस्तु संन्यासाद्विशिष्ट इति मे मतिः ॥ ६.८६ ॥

शृण्वन्तोऽपि वदन्तोऽपि स्पृशन्तोऽपि स्वकर्मणि ।

सक्ता अपि न सज्जन्ति पङ्के रविकरा इव ॥ ६.८७ ॥

तदेव विहितं किंचित्पुंसां सुकृतदुष्कृतम् ।

अज्ञानपिहिते ज्ञाने किं त्वेषा कर्मवासना ॥ ६.८८ ॥

ज्ञानेनोत्सारिता ज्ञानाः परां निष्ठामुपागताः ।

ब्राह्मणे वा श्वपाके वा विबुधाः समदृष्टयः ॥ ६.८९ ॥

बाह्ये सुखे विरक्तानां दुःखजन्मनि नश्वरे ।

अन्तःसुखारामतया परं ज्योतिः प्रसीदति ॥ ६.९० ॥

बहिः स्पर्शान्समुत्सृज्य भ्रूमध्यनिहितेक्षणः ।

नासान्तरे समौ धृत्वा प्राणापानौ विमुक्तये ॥ ६.९१ ॥

कामरागमदद्वेषभयक्रोधविवर्जितः ।

अहन्ता ज्ञानतमसां शान्तिं विन्दत्यमत्सरः ॥ ६.९२ ॥

▪ ▪ ▪ ▪ ▪ श्रीगीतासु पञ्चमोऽध्यायः ॥ ६ ॥ *****

क्रियावानफलाकाङ्क्षी निजं कर्म करोति यः ।

आरुरुक्षुदशातीतो योगारूढो विमत्सरः ॥ ६.९३ ॥

कूटस्थो ज्ञानतृप्तश्च पश्यत्यात्मानमात्मना ।

समासनः समाकारो निस्तरङ्ग इवोदधिः ॥ ६.९४ ॥

घ्राणाग्रदर्शी शान्तात्मा मामुपैति समाधिना ।

युक्ताहारादिचेष्टस्य नित्यं निष्कम्पचेतसः ॥ ६.९५ ॥

आत्मलाभो भवत्येव त्यक्तकामस्य योगिनः ।

मनः संयम्य पश्यन्ति स्रवत्येतद्यतो यतः ॥ ६.९६ ॥

आत्मानं मां च सर्वत्र ममात्मनि तथाखिलम् ।

मनसश्चञ्चलस्यास्य वैराग्येणैव संयमः ॥ ६.९७ ॥

तथाभ्यासेन बलिना वातस्येव प्रमाथिनः ।

एतदाकर्ण्य कौन्तेयः पुनः पप्रच्छ केशवम् ॥ ६.९८ ॥

लोलत्वान्मनसो देव योगाद्भ्रष्टस्य का गतिः ।

अर्जुनेनेति भगवान्पुनः पृष्टोऽभ्यभाषत ॥ ६.९९ ॥

योगभ्रष्टोऽपि पुरुषः शुभकृत्तु भविष्यति ।

चिरं भुक्त्वा सुखं दिव्यं स कल्याणपुरः सरः ॥ ६.१०० ॥

भोगिनां योगिनां वापि संभूतो महतां कुले ।

पूर्वाभ्यस्तं पुनर्धीमाञ्जन्मभिः प्रतिपद्यते ।

तपो ज्ञानाधिकं योगं तस्माद्योगी भवार्जुन ॥ ६.१०१ ॥

▪ ▪ ▪ ▪ ▪ श्रीगीतासु षष्ठोऽध्यायः ॥ ७ ॥ *****

मयि न्यस्तमना नित्यं भक्त्या मां वेत्ति मानव ।

अष्टमूर्तिरहं सर्वं जीवभूतश्चराचरे ॥ ६.१०२ ॥

उत्पत्तिस्थितिसंहारकारणं मां विदुर्बुधाः ।

सर्वे मत्प्राणिता भावा मयि सर्वं प्रतिष्ठितम् ॥ ६.१०३ ॥

देवीं मायां दधानं मां न जानाति विमोहितः ।

ये तु जानन्ति मां मायां भवन्ति कृतिनः सदा ॥ ६.१०४ ॥

अर्थी जिज्ञासुरार्तो वा ज्ञानी वा मां प्रपद्यते ।

प्रियः प्रियस्य सततं ज्ञानिनस्त्वस्मि गोचरे ॥ ६.१०५ ॥

अनन्यदेवताभक्ताः श्रद्धावन्तो विसंशयाः ।

वासुदेवः सर्वमिति यजन्ते मां मुमुक्षवः ॥ ६.१०६ ॥

ते ब्रह्माध्यात्मकर्माख्यं साधिभूतं विदन्ति माम् ।

साधिदैवाधियज्ञं च देहव्युपरमेष्वपि ॥ ६.१०७ ॥

▪ ▪ ▪ ▪ ▪ श्रीगीतासु सप्तमेऽध्यायः ॥ ८ ॥ *****

अच्युतेनेत्यभिहिते शक्रसूनुरभाषत ।

किमेतद्ब्रह्म भगवन्नधियज्ञः किमुच्यते ॥ ६.१०८ ॥

इति पृष्टो हृषीकेशो बभाषे श्वेतवाहनम् ।

अनश्वरं परब्रह्म भावोऽध्यात्मा तथात्मनः ॥ ६.१०९ ॥

निःसङ्गो भवकृत्कर्म नश्वरेष्वधिभूतता ।

अधिदैवोऽहमेवात्र ह्यधियज्ञोऽप्यहं विभुः ॥ ६.११० ॥

अन्तकाले स्मरन्तो मां प्रविशन्त्येव भाविताः ।

पर्यन्ते भावतुल्या हि नृणां जन्मान्तरस्थितिः ॥ ६.१११ ॥

कविं पुराणं शास्तारमणीयांसमणोरपि ।

परस्तात्तमसो नित्यं ये स्मरन्ति रविप्रभम् ॥ ६.११२ ॥

भ्रूमध्ये विहितप्राणा ब्रह्मरन्ध्रविभेदिनः ।

ओमित्येकाक्षरं ब्रह्म जपन्तो यान्ति ते परम् ॥ ६.११३ ॥

ब्रह्मादिभिर्भूतसर्गश्चक्रवत्परिवर्तते ।

परं मां प्रतिपन्नास्ते न भवन्ति भवे पुनः ॥ ६.११४ ॥

वैरञ्चेऽस्मिन्नहोरात्रे भवन्ति न भवन्ति च ।

भूतान्येकस्तु भगवानव्यक्तो न विनश्यति ।

तेजोमयमहः शुक्लो मोक्षायैवोत्तरायणम् ॥ ६.११५ ॥

- ▪ ▪ ▪ ▪ श्रीगीतास्वष्टमोऽध्यायः ॥ ९ ॥ *****

राजगुह्यमिदं चान्यत्पवित्रं शृणु फल्गुण ।

अश्रद्दधानो नाप्नोति मां संसारवशीकृतः ॥ ६.११६ ॥

सर्वकर्तरि भूतानि मयि सन्ति न तेष्वहम् ।

लोकाः स्थिता न स्थिताश्च मयि व्योम्नीव वायवः ॥ ६.११७ ॥

अधिष्ठितैषा प्रकृतिर्मया सूते चराचरम् ।

असक्तं मां न जानन्ति मलिनामोघदर्शिनः ॥ ६.११८ ॥

सर्वं सर्वगतं यज्ञं वेद्यं बीजं भवाभवम् ।

विदन्ति मां सुकुतिनः सर्वकारणकारणम् ॥ ६.११९ ॥

त्रयीधर्मजुषः स्वर्गभोगलाभक्षयाकुलाः ।

न प्राप्नुवन्ति मां शुष्कक्रियापाशवशीकृताः ॥ ६.१२० ॥

मदेकशरणा नित्यं कृतिनोऽनन्ययाजिनः ।

अप्यन्ययोनिसंभूताः स्वयमायान्ति यत्पदम् ॥ ६.१२१ ॥

- ▪ ▪ ▪ ▪ श्रीगीतासु नवमोऽध्यायः ॥ १० ॥ *****

भूयोऽपि मे शृणु सखे प्रीत्या यत्प्रतिबोध्यसे ।

न तत्त्वेनामरगणा मुनयो वा विदन्ति माम् ॥ ६.१२२ ॥

चराचरेऽस्मिन्प्रवरं यद्यत्पश्यसि भूतिमत् ।

तदहं सर्वभूतात्मा न हि किंचिन्मया विना ॥ ६.१२३ ॥

अहं विष्णुरहं सूर्यश्चन्द्रोऽहं मघवानहम् ।

शंकरोऽहं धनेशश्च वह्निः सुरगुरुस्तथा ।

अक्षरोऽहमहं कालो जयोऽहं भूतिरप्यहम् ॥ ६.१२४ ॥

- - - - - श्रीगीतासु दशमोऽध्यायः ॥ ११ ॥ *****

श्रुत्वैतदवदत्पार्थो जाने त्वां सर्वमच्युत ।

किंतु विश्वमयं रूपं द्रष्टुमिच्छमि ते विभो ॥ ६.१२५ ॥

इत्युक्तः पाण्डुपुत्रेण भगवान्कैटभान्तकः ।

विश्वाविष्कारकलया विश्वरूपमदर्शयत् ॥ ६.१२६ ॥

तस्यानन्तशिरोनेत्रसहस्रभुजशालिनः ।

देहे जगन्निवासस्य लीनं विश्वमदृश्यत ॥ ६.१२७ ॥

अतिसूर्याग्निमहसा तेजसा पूरिताम्बरम् ।

दृष्ट्वा पुलकितः पार्थस्तमुवाच कृताञ्जलिः ॥ ६.१२८ ॥

पश्याम्युदग्रगीर्वाणग्रामव्याप्तोरुविग्रहम् ।

त्वां येन पूरितं सर्वमनवच्छिन्नवर्ष्मणा ॥ ६.१२९ ॥

ब्रह्मरुद्रमरुद्वह्निमुनीन्द्रभुजगाकुलम् ।

द्रष्टुं तदेव पर्यन्तरहितं नोत्सहे वपुः ॥ ६.१३० ॥

भीष्मद्रोणमुखान्वीरान्प्रविष्टान्वदनानि ते ।

दंष्ट्रोत्कटानि पश्यामि कालस्येव युगक्षये ॥ ६.१३१ ॥

को भवान्सर्वसंहारारौद्रेण वपुषासूदनः ।

अकाण्डे दग्धुमखिलान्स्वयं लोकान्समुद्यतः ॥ ६.१३२ ॥

इत्युक्तवति कौन्तेये जगाद मधुसूदनः ।

अहं जगत्क्षयोत्क्षोपदीक्षितः क्षितिपान्तकः ॥ ६.१३३ ॥

कुरुसेनाग्रगान्वीरान्पूर्वं विनिहतान्मया ।

हत्वा यशःश्रिया जुष्टमवाप्नुहि कुलोचितम् ॥ ६.१३४ ॥

तच्छ्रुत्वा कालियारातेर्वचः पार्थः कृताञ्जलिः ।

उवाच कम्पितमनाः प्रणतो गद्गदस्वनः ॥ ६.१३५ ॥

कीर्त्या जगन्ति हृष्यन्ति स्तुतया सिद्धचारणैः ।

दीप्त्या द्रवन्ति रक्षांसि स्थाने तव जनार्दन ॥ ६.१३६ ॥

नौमि त्वां जगदावासं विश्वरूपमधोक्षजम् ।

अनन्तं शाश्वतं धाम सर्वात्मानं पुनः पुनः ॥ ६.१३७ ॥

क्षम्यतां तत्सुहृदिति स्वयं यत्प्रणतप्रियः ।

उक्तोऽसि कृष्ण गोविन्द यादवेति पुरा मया ॥ ६.१३८ ॥

उग्रं तदेवं भगवन्दृष्ट्वा रूपमहं महत् ।

चक्रारूढमिवाशेषं पश्यामि निखिलं जगत् ॥ ६.१३९ ॥

प्रसीद दर्शय विभो वपुः सौम्यं तदेव मे ।

शान्तिं मे याति सहसा नान्यता व्यथितं मनः ॥ ६.१४० ॥

इति प्रसादितः कृष्णः प्रणतेन किरीटिना ।

अदर्शयन्निजं रूपं तदेवाथ चतुर्भुजम् ॥ ६.१४१ ॥

देवा अपि न पश्यन्ति ममेदं सर्वगं वपुः ।

इत्युक्त्वाश्वासयामास कौन्तेयं कमलाधवः ॥ ६.१४२ ॥

- - - - - श्रीगीतास्वेकादसोऽध्यायः ॥ १२ ॥ *****

अथार्जुनोऽवदत्कृष्णं ये भक्तास्त्वामुपासते ।

अव्यक्तमक्षरं ये च तेषां केऽधिकयोगिनः ॥ ६.१४३ ॥

पार्थेनेति हरिः पृष्टो विहितानुग्रहोऽवदत् ।

मद्भक्ताः श्रद्धयोपेताः सर्वथा योगिनोऽधिकाः ॥ ६.१४४ ॥

क्लेशेनैव तु मत्प्राप्तिरव्यक्ताक्षरसेवनात् ।

सूक्ष्मस्थूलगतिर्दुःखं तत्त्वज्ञैरप्यवाप्यते ॥ ६.१४५ ॥

मद्भक्तास्त्वचिरादेव प्राप्नुवन्ति परं पदम् ।

अतस्त्वं मन्मना नित्यमनन्यनिरतो भव ॥ ६.१४६ ॥

वशे यदि न ते चित्तमभ्यासेन गृहाण तत् ।

तत्राप्यशक्तो मत्कर्मा सततं श्रेयसे भव ॥ ६.१४७ ॥

अथवा फलसंन्यासं कर्मणां कुरु मत्परः ।

ज्ञानं हि परमाभ्यासाज्ज्ञानाद्ध्यानमिहोत्तमम् ॥ ६.१४८ ॥

ध्यानाच्च फलसंन्यासस्ततः शान्तिर्विशिष्यते ।

अद्वेष्टा करुणासिन्धुः सुखदुःखसमः शमी ॥ ६.१४९ ॥

उदासीनः शुचिर्दक्षः क्षमी भक्तः प्रियो मम ।

- - - - - श्रीगीतासु द्वादशोऽध्यायः ॥ १३ ॥ *****

शरीरं क्षेत्रमित्याहुः क्षेत्रज्ञं मां विदुर्बुधाः ।

क्षेत्रं तत्सविकारं तु माया भूतादि च स्थितम् ॥ ६.१५० ॥

शान्तानां दृष्टदोषाणां ज्ञानिनां न विमोहनम् ।

मानदम्भमदक्रोधत्यागो गुरुनिषेवणम् ॥ ६.१५१ ॥

असक्तिर्नश्वरे नित्यं ज्ञानमज्ञानमन्यथा ।

ज्ञेयं तु मन्मयं ब्रह्म शुद्धं सदसतोः परम् ॥ ६.१५२ ॥

सर्वतः पाणिवदनं सर्वाकारमनामयम् ।

प्रकृतिः पुरुषश्चेति क्षेत्रक्षेत्रज्ञसंगमः ॥ ६.१५३ ॥

प्रकृतिः करणे हेतुर्भोक्ता तु पुरुषः स्मृतः ।

एकस्थानं पृथग्भावं भूतानां योऽनुपश्यति ॥ ६.१५४ ॥

तत्संगमाच्च विस्तारं स याति ब्रह्म शाश्वतम् ।

परमात्मा गुणातीतो नित्यत्वादयमव्ययः ।

भौतिकेऽपि स्थितः काये सर्वव्यापी न लिप्यते ॥ ६.१५५ ॥

- ▪ ▪ ▪ ▪ ▪ श्रीगीतासु त्रयोदशोऽध्यायः ॥ १४ ॥ *****

सर्वज्ञानमिदं भूयः श्रूयतां सुरसेवितम् ।

यद्योगो ब्रह्मगर्भेऽस्मिन्संभवन्मूर्तिसंभवः ॥ ६.१५६ ॥

सत्त्वादयस्तदुद्भूता विभान्त्येते गुणास्त्रयः ।

वैचित्र्यादनिशं येषां संसरन्ति शरीरिणः ॥ ६.१५७ ॥

सत्त्वं प्रकाशकं ज्ञेयं यदुत्थैः स्तम्भकं रजः ।

तमो ह्यावरणं मोहप्रमादाद्यस्य संभवः ॥ ६.१५८ ॥

सततं संकरेणैषां न्यूनाधिक्यविभेदतः ।

गुणदोषाश्च दृश्यन्ते ते ते किल शरीरिणाम् ॥ ६.१५९ ॥

मद्भक्ताः शान्तमनसो जीवन्मुक्तिदशां श्रिताः ।

गुणैरेतैः परित्यक्ता भजन्ते सुखमक्षयम् ॥ ६.१६० ॥

- ▪ ▪ ▪ ▪ ▪ श्रीकीतासु चतुर्दशोऽध्यायः ॥ १५ ॥ *****

ऊर्ध्वमूलं भवाश्वत्थमाब्रह्मसदनोदितम् ।

लोकान्तरानेकशाखं विचित्रविषयाङ्कुरम् ॥ ६.१६१ ॥

गुणकर्मप्रबुद्धानां शुभाशुभफलोदयम् ।

स्वभावभूमाववृतं जानीते यः स वेदवित् ॥ ६.१६२ ॥

तमसङ्गकुठारेण च्छित्त्वा यान्ति पदं मम ।

निरस्तमोहं वैमल्यादतिसूर्येन्दुपावकम् ॥ ६.१६३ ॥

यदंशो जीवलोकेऽस्मिञ्जीवश्चरति सर्वगः ।

वायुर्गन्धमिवादाय यो यातीन्द्रियवासनाः ॥ ६.१६४ ॥

तद्विधं गुणयुक्तानां सर्वावस्थासु निर्गुणम् ।

पश्यन्ति ज्ञानिनः सर्वजगतां जीवनं परम् ॥ ६.१६५ ॥

भूतसर्गामिवागत्य अक्षरोऽहं सनातनः ।

मन्मया धृतिमन्तो मां भजन्ते पुरुषोत्तमम् ॥ ६.१६६ ॥

- ▪ ▪ ▪ ▪ ▪ श्रीगीतासु पञ्चदशोऽध्यायः ॥ १६ ॥ *****

अभीः सत्त्वं शुचिर्ज्ञानं दमो दानं तपः क्रतुः ।

अहिंसाया गुणाश्चान्ये जायन्ते दिव्यसंपदाम् ॥ ६.१६७ ॥

दम्भमानमदक्रोधपारुष्याज्ञानचापलैः ।

आसुरी सूच्यते संपन्मोहसोकविवर्धिनी ॥ ६.१६८ ॥

युक्तोऽपि सततं दिव्यसंपदा मा शुचः सखे ।

आसुरं भावमापन्ना भजन्ते योनिमासुरीम् ॥ ६.१६९ ॥

सत्त्वादिभिर्गुणैर्बद्धो ज्ञायते चेष्टितैर्जनः ।

मनोभोजनमाचारो गुणतुल्यो हि देहिनाम् ॥ ६.१७० ॥

- ▪ ▪ ▪ ▪ ▪ श्रीगीतासु षोडशोऽध्यायः ॥ १७ ॥ *****

आकर्ण्यैतदथोवाच फल्गुनः पुनरच्युतम् ।

संन्यासत्यागयोस्तत्वं ज्ञातुमिच्छाम्यहं विभो ॥ ६.१७१ ॥

उक्ते पाण्डुसुतेनेति भगवानभ्यभाषत ।

काम्यकर्मफलत्यागं संन्यासं संप्रचक्षते ॥ ६.१७२ ॥

सर्वकर्मफलत्यागस्त्याग इत्यभिधीयते ।

म(स)त्कर्म न परित्याज्यं त्याज्यं तु विधिगर्हितम् ॥ ६.१७३ ॥

नित्यकर्मपरित्यागो मोहात्तामस उच्यते ।

क्लेशदुःखभयात्त्यागो राजसो निष्फलः स्मृतः ।

कुर्वतामप्यसक्तानां त्यागः सत्त्वोचितो मतः ॥ ६.१७४ ॥

- ▪ ▪ ▪ ▪ ▪ श्रीगीतासु सप्तदशोऽध्यायः ॥ १८ ॥ *****

कर्म कर्ता च बुद्धिश्च त्रिविधा गुणभेदतः ।

धृतिः सुखं च त्रैगुण्यात्त्रिविधं देहिनां मतम् ॥ ६.१७५ ॥

यथोक्तसेवी निःसङ्गः कुरु कर्म निजं सखे ।

मद्भक्तो मत्स्तुतिपरः परं पदमवाप्स्यसि ॥ ६.१७६ ॥

इदं भक्ताय ते ज्ञानमुपदिष्टं मया स्वयम् ।

यः श्रोष्यति स संसारदुःखान्यतितरिष्यति ॥ ६.१७७ ॥

कच्चिन्मोहो विनष्टस्ते कच्चिदेतच्छ्रुतं त्वया ।

केशवेनेति कथिते बभाषे शक्रनन्दनः ॥ ६.१७८ ॥

भगवन्वीतमोहोऽहं करिष्ये तव शासनम् ।

उक्त्वेति वीरो गाण्डीवमाचकर्ष रणोत्सुकः ॥ ६.१७९ ॥

▪ ▪ ▪ ▪ ▪ श्रीगीतास्वंष्टादशोऽध्यायः ॥ १९ ॥ *****

अथोदतिष्ठद्गम्भीरजलदध्वानमन्थरः ।

युयुत्सुं पार्थमालोक्य सैन्यानां हर्षनिःस्वनः ॥ ६.१८० ॥

पूर्वं ततः सुभटकङ्कटपातिखङ्गटाङ्कारनादमुखरेषु बलेषु राज्ञाम् ।

धर्मात्मजः कवचचापशरान्विमुच्य देवव्रताभिमुखमुत्सुकधीः ससर्प ॥ ६.१८१ ॥

धिग्धिङ्नृपं कृपणचेष्ट मनुष्यसंज्ञं भीरुं युधिष्ठिरमलीककृताभिधानम् ।

याच्ञा कृताञ्जलिरुपैति परान्यदेष शूरास्तदिङ्गितजडाः पृथगित्यवोचन् ॥ ६.१८२ ॥

सोऽप्यच्छकीर्तिरथ भीष्ममुखानुपेत्य प्रह्वः शरीरपणसंश्रितधार्तराष्ट्रान् ।

तत्पादलग्नमुकुटः प्रकटं प्रणम्य लेभे तदाशिषमशेषमहीपजैत्रीम् ॥ ६.१८३ ॥

अभ्याहतं च रणरङ्गमृदङ्गतूर्ये पार्थान्गुणैकरसिको गुणवान्युयुत्सुः ।

अभ्याययौ तव सुतः स्वकुरून्निरस्य धावन्ति तुल्यगुममेव नृणां मनांसि ॥ ६.१८४ ॥

अस्मिन्महाक्षयमुखे करवालपट्टसंरक्षितप्रतिमुखे रणरङ्गनाट्ये ।

व्याकीर्णकीर्तिकुसुमाञ्जलिरर्जुनाग्रनान्दीमिवापठदमन्दधनुर्निनादैः ॥ ६.१८५ ॥

अत्रान्तरे नृपतिचक्रकिरीटकोटिसंपातजातवबुशाकुलविस्फुलिङ्ग ।

जैत्री त्रिशूलकरशिष्यमुनेरुदग्रा गाङ्गेयशातविशिस्वावलिरुल्ललास ॥ ६.१८६ ॥

संत्राससंकुचितनिश्चलकर्णतालदिक्कुञ्जराकलितकम्पितसर्वलोकम् ।

क्षुभ्यत्क्षयाम्बुधरभैरवभीमनादं भीमं निशम्य भयमाविरभूद्भटानाम् ॥ ६.१८७ ॥

अथ भीमं समभ्यायात्स्वयं राजा सुयोधनः ।

भ्रातृभिः सहितो वीरैर्धुनानो विपुलं धनुः ॥ ६.१८८ ॥

ततः प्रवृत्ते संग्रामे दुर्लक्ष्ये शरवृष्टिभिः ।

स्वयं शान्तनवः श्रीमानभ्यधावद्धनंजयम् ॥ ६.१८९ ॥

सात्यकिं कृतवर्मा च ह्यभिमन्युं बृहद्बलः ।

दुःशासनोऽपि नकुलं सहदेवं च दुर्मुखः ॥ ६.१९० ॥

युधिष्ठिरं तथा शल्य आचार्यो द्रुपदात्मजम् ।

सोमदत्तश्च वैराटिं बाह्लिकश्चेदिभूपतिम् ॥ ६.१९१ ॥

रक्षसां प्रवरं वीरं घटोत्कचमलुम्बुसः ।

शिखण्डिनं द्रोणसुतो मत्स्यं प्राग्ज्योतिषेश्वरः ॥ ६.१९२ ॥

कृपः केकयभूपालं द्रुपदं च जयद्रथः ।

सुतसोमं विकर्णश्च भीमसेनसुतं बली ॥ ६.१९३ ॥

चेकितानः विकर्णश्च प्रऐतिविन्ध्यं च सौबलः ।

इरावतश्च विक्रान्तं शतायुः फल्गुणात्मजम् ॥ ६.१९४ ॥

विन्दानुविन्दावावन्त्यौ कुन्तिभोजं यशस्विनम् ।

कौरवो वीरबाहुश्च विराटसुतमुत्तरम् ॥ ६.१९५ ॥

अन्ये च वीरा राजानो राजसिंहाः प्रहारिणः ।

उत्साहसत्त्वसंपन्नाः ससैन्याः यमुपाद्रवन् ॥ ६.१९६ ॥

तेषां कङ्कणरत्नांशुपटलाः करनिर्गताः ।

हेमपुङ्खा शराश्चक्रुर्वह्निव्याप्तं दिगन्तरम् ॥ ६.१९७ ॥

अथोपुङ्खा रजसा गजवाजिरथाकुलम् ।

वीराणां तुमुलं युद्धं निर्मर्यादमवर्तत ॥ ६.१९८ ॥

ततः शिरोभिर्वीराणां पतितोत्फुल्लितैर्मुहुः ।

अमन्दकन्दुकक्रीडा बभूवेव रणश्रियः ॥ ६.१९९ ॥

ततः पाण्डवसैन्येषु भीष्मचापच्युतैः शरैः ।

विदारितेष बहुशः समुत्तस्थौ महारवः ॥ ६.२०० ॥

अथाभिमन्युरभ्येत्य शतमन्युसुतात्मजः ।

भीष्ममभ्याद्रवद्वीरो मिषतां सर्वभूभुजाम् ॥ ६.२०१ ॥

कृतवर्मप्रभृतिभिः सहितं भीष्ममोजसा ।

अयोधयत्स विशिश्वैर्ध्वजमस्य चकर्त च ॥ ६.२०२ ॥

हेमताले निपतिते संरब्धोऽथ पितामहः ।

दिव्यास्त्रवर्षी सावेगं सौभद्रं समुपाद्रवत् ॥ ६.२०३ ॥

ततो वृकोदरमुखा विनदन्तो महारथाः ।

सानुगं शन्तनुसुतं समन्तात्पर्यवारयन् ॥ ६.२०४ ॥

भीष्मोऽपि सात्यकिं विद्ध्वा ध्वजं पवनजन्मनः ।

उन्ममाथ शराग्रेण हैमं केसरिणं रथात् ॥ ६.२०५ ॥

अत्रान्तरे गिरिप्रांशुमारुह्य मदकुञ्जरम् ।

अयोध्यन्मद्रराजं हृष्टो वैराटिरुत्तरः ॥ ६.२०६ ॥

स कुञ्जरेन्द्रः शल्यस्य पादेन चतुरो हयान् ।

जघानाकृष्य हस्तेन गर्जञ्जलदनिःस्वनः ॥ ६.२०७ ॥

ततो मद्राधिपः क्रुद्धः शक्तिं शक्तिमतां वरः ।

प्रदीप्तां प्राहिणोद्वेगादुत्तरायेषुवर्षिणे ॥ ६.२०८ ॥

स तया भिन्नहृदयः पपात गलितायुधः ।

कर्णिकार इव भ्रष्टः करीन्द्राचलशेखरात् ॥ ६.२०९ ॥

उत्तरं निहतं दृष्ट्वा शङ्खस्तस्यानुजः क्रुधा ।

चकार शल्यमभ्येत्य शरैर्जटिलविग्रहम् ॥ ६.२१० ॥

तस्य शल्योऽथ गदया विदार्य दलशो रथम् ।

उन्ननादाभवन्येन दिशः शकलिता इव ॥ ६.२११ ॥

शङ्खो हताश्वः सहसा फल्गुणस्य रथं ययौ ।

भीष्मोऽथ पाण्डवचमूं व्यगाहत नृपान्तकः ॥ ६.२१२ ॥

मत्स्यकेकयापाञ्चालचेदिसेनासु सर्वशः ।

भीष्मबाणविभिन्नासु सूर्योऽस्तशिखरं ययौ ॥ ६.२१३ ॥

ततो निवृत्ते संग्रामे शिबिराणि नरेश्वराः ।

भेजिरे प्रतिसंसन्तो विपुलं भीष्मविक्रमम् ॥ ६.२१४ ॥

- - - - - प्रथमे युद्धदिवसे उत्तरवधः ॥ २० ॥ *****

दिनान्ते दीर्णपृतनः शोकार्तो धर्मनन्दनः ।

संहारं निजसैन्यानां प्रदध्यौ भीष्मविक्रमम् ॥ ६.२१५ ॥

स राजमध्ये गोविन्दमुवाच करुणाकुलः ।

क्षीयमाणस्य समरे सत्यं श्रेयस्तपो मम ॥ ६.२१६ ॥

अलं युद्धेन मे कृष्ण पृथिवीक्षयकारिणा ।

को मुच्येत रणे प्राप्य भीष्मं भीष्मपराक्रमम् ॥ ६.२१७ ॥

इति ब्रुवाणं राजानमुवाच मधुसूदनः ।

ध्रुवस्ते विजयो राजन्यस्य योद्धा धनंजयः ॥ ६.२१८ ॥

सात्यकिर्द्रुपदः शैब्यः सिखण्डी पञ्च केकयाः ।

सौभद्रश्च रणे क्रुद्धो हन्यादेव गणानपि ॥ ६.२१९ ॥

उक्ते जनार्दनेनेति तीव्रं भीष्मपराक्रमम् ।

मिथः कथयतां तेषां सा जगाम विभावरी ॥ ६.२२० ॥

अथोदिते सहस्रांशौ विहिते पाण्डुनन्दनैः ।

क्रुञ्चव्यूहे महोत्साहैर्व्यूहमन्येऽपि चक्रिरे ॥ ६.२२१ ॥

ततः प्रवृत्ते समरे तीव्रे भीरुभयंकरे ।

हृदयाकम्पने नाज्ञां तालकेतुरदृश्यत ॥ ६.२२२ ॥

गम्भीरधीरसंरम्भो वर्जयन्स पृथग्जनम् ।

चकर्त भूभुजामेव शिरांसि लघुविक्रमः ॥ ६.२२३ ॥

भीष्मेणालोलिते व्यूहे वातोद्धूत इवार्मवे ।

तमभ्यधावत्संरब्धः श्वेताश्वोऽच्युतसारथिः ॥ ६.२२४ ॥

तमापतन्तं विशखैर्भीष्मः क्षिप्रमपूरयत् ।

द्रोणदुर्योधनमुखाः सर्वे चान्ये महारथाः ॥ ६.२२५ ॥

पार्थोऽपि सायकैश्चक्रे समन्तात्कुरुवाहिनीम् ।

तत्पक्षपवनस्फारैर्दीर्णामिव सहस्रधा ॥ ६.२२६ ॥

दुर्योधनप्रेरितोऽथ स्वयं शन्तनुनन्दनः ।

निन्दन्निजं क्षत्रधर्ममभ्यदावद्धनंजयम् ॥ ६.२२७ ॥

निर्विशेषं तयोस्तत्र सुचिरं युध्यमानयोः ।

निरुद्धां शरजालेन नादृश्यन्त दिशो दश ॥ ६.२२८ ॥

न ददर्श तयोः कश्चिदन्तरं क्षिपतोः शरान् ।

धारासारप्रबलयोर्नदतोरिव मेघयोः ॥ ६.२२९ ॥

ततो द्रोणमुखा वीरा धृष्टद्युम्नपुरोगमैः ।

अयुध्यन्ताभवन्येन सुराः पुलकिता दिवि ॥ ६.२३० ॥

भीमसेनः कलिङ्गानां प्रविश्याथ वरुथिनीम् ।

पातयन्कुञ्जरांश्चक्रे निःसंचारां वसुंधराम् ॥ ६.२३१ ॥

भीमनिर्भिन्नमत्तेभकुम्भोद्भूतासृगम्भसाम् ।

प्रवाहैर्ययुराकण्ठं तुरङ्गाः कृच्छगामिनः ॥ ६.२३२ ॥

निहत्य कुञ्जरानीकं कलिङ्गानां प्रहारिणाम् ।

केतुमन्तं नरपतिं जघान सपदानुगम् ॥ ६.२३३ ॥

निःशेषितकलिङ्गस्य भीमसेनस्य नादतः ।

घनगम्भीरनादेन पृथिवी समकम्पत ॥ ६.२३४ ॥

ततो भीष्मः समभ्येत्य दृष्ट्वा दीर्णामनीकिनीम् ।

विधाय विरथं भीमं शैनेयाश्वानपोथयत् ॥ ६.२३५ ॥

दुर्योधनसुतं वीरं लक्ष्मणं शौर्यलक्षणम् ।

अभिमन्युः शितैर्बाणैः क्षिप्रहस्तमपोथयत् ॥ ६.२३६ ॥

गोचरे पतितं पुत्रं सौभद्रस्य प्रमाथिनः ।

दृष्ट्वा दुर्योधनो राजा सानुगः स्वयमाद्रवत् ॥ ६.२३७ ॥

कुरुवीरैः परिवृतं विलोक्य सुतमर्जुनः ।

मण्डलीकृतगाण्डीवस्तूर्णं प्रत्युद्ययौ परान् ॥ ६.२३८ ॥

लाघवादभितस्तस्य सायकाश्चित्रयोधिनः ।

जह्रुः शिरांसि शूराणां फलानीव महीरुहाम् ॥ ६.२३९ ॥

आखण्डलभुवा चण्डगाण्डीवप्रेरितैः शरैः ।

विदारितेष्वनीकेषु विध्वस्तरथसादिषु ॥ ६.२४० ॥

रुधिरेणेव गगने संध्यारागेम पूरिते ।

अवहारं रणे चक्रे वासरान्ते पितामहः ॥ ६.२४१ ॥

- - - - - दितीयो युद्धदिवसः ॥ २१ ॥ *****

अन्येद्युर्गारुडं व्यूहं दृष्ट्वा भीष्मेण कल्पितम् ।

अर्धचन्द्रं प्रतिव्यूहं चक्रिरे पाण्डुनन्दनाः ॥ ६.२४२ ॥

ततः प्रवृते समरे भीरूणां धृतिखण्डने ।

आरूढेव महीव्योम रजसा समलक्ष्यत ॥ ६.२४३ ॥

असृक्प्रवाहैः सहसा प्रशान्ते रेणुमण्डले ।

सुघोरः संप्रहारोऽभून्नृपाणां त्रिदशेक्षितः ॥ ६.२४४ ॥

भीष्मद्रोणमुखैर्वीरैः। फल्गुणप्रमुखा रणे ।

संसक्ताः समदृश्यन्त पूर्वदेवैरिवामराः ॥ ६.२४५ ॥

बाणजालेन महता संहतानां समन्ततः ।

अर्जुनेन निरुद्धासु रिपूणां शस्त्रवृष्टिषु ॥ ६.२४६ ॥

अकम्पितौ कुरुव्यूहे भीमसेनघटोत्कचौ ।

प्रविश्य चक्रतुर्वीरौ व्याकुलां परवाहिनीम् ॥ ६.२४७ ॥

तावभ्यधावत्संरम्भादमर्षी धृतराष्ट्रजः ।

कुर्वन्नाजसमाजेन मौलिरद्नारुणा दिशः ॥ ६.२४८ ॥

हैडम्बबाणनिहता वीरास्तस्य पदानुगाः ।

महावातसमाक्रान्ता द्रुमा इव चकम्पिरे ॥ ६.२४९ ॥

दुर्योधनप्रेरितानां शराणां दीप्ततेजसाम् ।

वृष्टिमभ्युद्गतां घोरां चिच्छेदाशु वृकोदरः ॥ ६.२५० ॥

भीमोत्सृष्टेन पृथुना पृषङ्के(त्के)नाथ कौरवः ।

हृदि विद्धो निमग्नेन मुमोह भृशविह्वलः ॥ ६.२५१ ॥

तस्मिन्सारथिना नीते रथेनाकुलकेतुना ।

दुद्राव सैन्यं तत्सर्वं पश्यतोर्द्रेणभीष्मयोः ॥ ६.२५२ ॥

महारथैर्वारितेऽपि कीर्णे तस्मिन्बलार्णवे ।

प्रत्युद्ययौ समाश्वस्य तूर्णं राजा सुयोधनः ॥ ६.२५३ ॥

पार्थसात्यकिसौभद्रैः स दृष्ट्वा बहुशश्चमूम् ।

विद्रावितां समभ्येत्य पितामहमभाषत ॥ ६.२५४ ॥

दारितं पश्य मे सैन्यं लब्धलक्षैररातिभिः ।

पाण्डुपुत्रेषु कृपया त्वयि माध्यस्थ्यमाश्रिते ॥ ६.२५५ ॥

अलं द्रोमसहायस्य परिस्थातुं पुरस्तव ।

मदभाग्यवशान्न स्याद्यदि पार्थेषु वः कृपा ॥ ६.२५६ ॥

एतत्सुयोधनेनोक्तं श्रुत्वा सुरसरित्सुतः ।

ईषत्स्मितसुधाधौतकपोलफलकोऽवदत् ॥ ६.२५७ ॥

उक्तोऽसि बहुशो राजन्नजेयाः पाण्डवा इति ।

यत्तु शक्यं मया किंचिद्वृद्धेनाद्य करोमि किम् ॥ ६.२५८ ॥

इत्युक्त्वा चापमाकृष्य तालमात्रं महाभुजः ।

मन्दायमाने दिवसे सममभ्युद्ययौ परान् ॥ ६.२५९ ॥

ततो भीष्मरथोदीर्णैः शरैः सूर्यकरप्रभैः ।

विदारितान्यनेकानि तमांसीव क्षयं ययुः ॥ ६.२६० ॥

तोमरेष्वातपत्रेषु शरीरेषु च भूभुजाम् ।

पेतुः पुनरभावाय भीष्मनामाङ्किताः शराः ॥ ६.२६१ ॥

अदृष्टपुङ्खवदनैर्घनश्रेणीकृतैर्मुहुः ।

तत्सायकैरदृश्याभूत्पाण्डवानामनीकिनी ॥ ६.२६२ ॥

तं युध्यमानं दीप्तास्त्रं वर्जयन्तोऽपि संगरे ।

दिक्षु भीष्मसहस्राणि ददृशुः सर्वपार्थिवाः ॥ ६.२६३ ॥

व्रजत्सु राजचक्रेषु भीष्मानलपतङ्गताम् ।

एकेनैकेन बाणेन भिन्नेषु त्रिषु दन्तिषु ॥ ६.२६४ ॥

याते सहस्रधा सैन्ये पाण्डवानां तरस्विनाम् ।

अनयत्फल्गुणरथं गाङ्गेयान्तिकमच्युतः ॥ ६.२६५ ॥

ततोऽभवद्भीष्मशरैर्भास्वरैः सव्यसाचिनः ।

क्षणं पञ्चाननस्येव चारुकाञ्चनपञ्जरः ॥ ६.२६६ ॥

निरुद्धशरसंचारो यत्नेन शतमन्युजः ।

विचित्रैर्विचरन्मार्गैर्युयुधे कृष्णसारथिः ॥ ६.२६७ ॥

तस्यातिमानुषं धैर्यमास्थितस्य पितामहः ।

साधु पुत्रेति संहृष्टः पराक्रममपूजयत् ॥ ६.२६८ ॥

तत्कङ्कपत्त्रिनिर्भिन्नौ कृष्णावेकरथे स्थितौ ।

रक्ताशोकाविवोत्फुल्लौ बभतुः क्षतजोक्षितौ ॥ ६.२६९ ॥

ततो निरन्तरैर्बाणैर्भीष्मकार्मुकनिर्गतैः ।

आक्रान्तभुवनाभोगैर्नादृश्यन्त दिशो दश ॥ ६.२७० ॥

भीष्मे पृथुशरज्वाले कालानल इवोद्यते ।

दुद्राव पाण्डवचमूः पश्चादभिसृता परैः ॥ ६.२७१ ॥

भग्नेषु भटमुख्येषु बभाषे कैटभान्तकः ।

क्व नु मानधना यूयमपारयशसो रणे ।

परित्यज्य कुलाचारं याताः कातरतामिमाम् ॥ ६.२७२ ॥

इत्युक्त्वा तान्समालोक्य विद्रुतानेव केशवः ।

उवाच सात्यकिं वीरं युध्यमानं प्रयत्नतः ॥ ६.२७३ ॥

तिष्ठन्तु यान्तु वा सर्वे सात्यके पृतनाग्रगाः ।

एष स्वयं निहन्म्यद्य सानुगं शन्तनोः सुतम् ॥ ६.२७४ ॥

इत्युक्त्वा चण्डमार्तण्डमण्डलाग्रं सुदर्शनम् ।

स्वयमुद्यम्य कंसारिः स्यन्दनाग्रादवातरत् ॥ ६.२७५ ॥

क्रुद्धस्य तस्य कल्पान्तकरालानलरोचिषः ।

न रूपं सेहिरे द्रष्टुं सुरा अपि दिवि स्थिताः ॥ ६.२७६ ॥

संरम्भोद्भ्रान्तदोर्दण्डविलसत्पीतवाससा ।

शोभां भेजे स नीलाद्रेः सर्पत्संध्याभ्रशालिनः ॥ ६.२७७ ॥

तमन्तकमिवायान्तं जगत्संहारदीक्षितम् ।

धीरः शान्तनवो दृष्ट्वा धुनानो धनुरभ्यधात् ॥ ६.२७८ ॥

एह्येहि भगवन्विष्णो जिष्णो त्रिदशविद्विषाम् ।

चक्रेण मे शिरश्छिन्धि भवक्लेशकृशानुना ॥ ६.२७९ ॥

भवता नाभिजाम्भोजसमुद्भूतस्वयंभुवा ।

हतो जगन्निवासेन धन्यतां यात्वयं जनः ॥ ६.२८० ॥

सिद्धसिन्धुसुतेनेति भाषिते नतमौलिना ।

अवरुह्य रथात्तूर्णमर्जुनः कृष्णमन्वगात् ॥ ६.२८१ ॥

स निष्पीड्य बलात्पादौ पुरस्तात्कालियद्विषः ।

उवाच संहर विभो कोपं विश्वक्षयोचितम् ॥ ६.२८२ ॥

क्षपयामि रिपून्सर्वान्युधि सत्येन ते शपे ।

इति प्रसाद्य तं पार्थो रथमारोपयत्पुनः ॥ ६.२८३ ॥

ततो गाण्डीवघोषेण पाञ्चजन्यरवेण च ।

चक्राते राजचक्राणां कृष्णौ कृष्णाम्बुदभ्रमम् ॥ ६.२८४ ॥

ततो निर्विवरैर्बाणैः शल्यभिरिश्रवःशलाः ।

अवाकिरन्भीष्ममुखाः फल्गुणं शस्त्रवृष्टिभिः ॥ ६.२८५ ॥

तामायुधमहावृष्टिं छित्त्वा सपदि पाण्जवः ।

माहेन्द्रमस्त्रं विदधे सर्वलोकक्षयक्षमम् ॥ ६.२८६ ॥

तस्मिन्नुदीर्णे सहसा महास्त्रे दीप्ततेजसि ।

चण्डवातविकीर्णेव चकम्पे कुरुवाहिनी ॥ ६.२८७ ॥

वध्यमानेषु सैनेषु क्षिप्रं गाण्डीवधन्वना ।

नरनागाश्वदेहोत्था ससर्प रुधिरापगा ॥ ६.२८८ ॥

छत्राच्छफेनपटलां चलच्चामरसारसाम् ।

केशशेवालशबलां पिशाचास्तां सिषेविरे ॥ ६.२८९ ॥

घोरे नृपक्षये तस्मिन्वर्तमाने रणोत्सवे ।

संध्यया दिक्षु जातासु शोणितेन भृतास्विव ॥ ६.२९० ॥

यातेऽस्तं चण्डकिरणे प्रत्यग्ररुधिरत्विषि ।

मांसपिण्ड इव ग्रस्ते घोरेण ध्वान्तरक्षसा ॥ ६.२९१ ॥

विध्वस्तचापकवचा विप्रकीर्णरथध्वजाः ।

अवहारमकुर्वन्त पाण्डवाः शस्त्रविक्षताः ॥ ६.२९२ ॥

▪ ▪ ▪ ▪ ▪ तृतीयो युद्धदिवसः ॥ २२ ॥ *****

पुनः प्रभाते संरब्धा निर्ययुः कुरुपाण्डवाः ।

विनदन्तो महोत्साहा व्याडव्यूहाग्रवर्तिनः ॥ ६.२९३ ॥

अथ प्रवृत्ते समरे पृथिवीक्षयशंसिनि ।

सौभद्रप्रमुखा वीरान्भीष्ममुख्यानयोधयन् ॥ ६.२९४ ॥

ततः शरशतासारसंपूरितदिगन्तरः ।

महारथानतीत्यान्यान्भीष्मोर्ऽजुनमुपाद्रवत् ॥ ६.२९५ ॥

निर्विशेषं तयोः क्षिप्रं पीरयोर्युध्यमानयोः ।

एको द्रोणिमुखान्वीरानभिमन्युरयोधयत् ॥ ६.२९६ ॥

छिन्नवर्मध्वजरथान्स विधाय महारथान् ।

शिरःप्रकरमुच्छिन्नं राज्ञां क्षिप्रमपातयत् ॥ ६.२९७ ॥

द्रोणप्रभृतिभिः सर्वैर्दृष्ट्वा सौभद्रमावृतम् ।

धृष्टद्युम्नश्चमूनाथश्चकर्ताभ्येत्य कौरवान् ॥ ६.२९८ ॥

स हत्वा चामरं शूरः पौरव्यतनयं नृपम् ।

शिरःसंयमनेः कायाज्जहाराकुलकुण्डलम् ॥ ६.२९९ ॥

अत्रान्तरे गजानीकैर्विपुलैश्च गजाधिपः ।

भीमदुर्योधनादिष्टो गदापाणिः समाद्रवत् ॥ ६.३०० ॥

भीमसेनोऽथ रभसादवरुह्य रथाद्गजान् ।

गर्जन्नुरुगदाघातैर्जघान घनविक्रमः ॥ ६.३०१ ॥

गदाप्रहाराभिहतैर्वज्रभिन्नैरिवाचलैः ।

पतद्भिर्मत्तमातङ्गैश्चकम्पे चकितेव भूः ॥ ६.३०२ ॥

निहते कुञ्जरानीके भीमेन भयदायिना ।

तमभ्यधावन्संक्रुद्धाः सर्वे दुर्योधनादयः ॥ ६.३०३ ॥

सुयोधनशराघातमूर्छितोऽथ वृकोदरः ।

समाश्वास्य परानीकं रथेन कुपितोऽविशत् ॥ ६.३०४ ॥

विश्वसंहारसंक्रुद्धं तं कृतान्तमिवोत्थितम् ।

प्राप्यानुजाः कुरुपतेश्चतुर्दश ययुः क्षयम् ॥ ६.३०५ ॥

सेनापतिं सुषेणं च जयसंधं सुलोचनम् ।

भीममुग्रं भीमरथं भीमबाहुमलोलुपम् ॥ ६.३०६ ॥

समं ववित्सुं कटकं दुर्मुखं दुष्प्रदर्शनम् ।

हत्वैनामकरोत्सेनां कौरवाणां सहस्रधा ॥ ६.३०७ ॥

तमभ्यधावन्मत्तेन सुप्रतीकेन दन्तिना ।

गम्भीरघोरघोषेण भगदत्तः सहानुगैः ॥ ६.३०८ ॥

गजोदयाचलरवेः शरैस्तीक्ष्णैरिवांशुभिः ।

प्रतापधाम्नस्तस्यारात्स च कोपारिवाहिनी ॥ ६.३०९ ॥

तत्सायकेन विद्धोऽथ हृदि मर्मावभेदिना ।

ध्वजयष्टिं समालम्ब्य तस्थौ भीमोऽतिमूर्छितः ॥ ६.३१० ॥

ततो घटोत्कचः क्रुद्धो दृष्ट्वा जनकमाकुलम् ।

भगदत्तमभिद्रुत्य घोरां मायां समाददे ॥ ६.३११ ॥

ऐरावणगतः सोऽथ प्रभिन्नैर्दिग्द्विपैः सह ।

अपीडयत्सुप्रतीकं दीप्ताभिः शस्त्रवृष्टिभिः ॥ ६.३१२ ॥

तस्य निर्भिद्यमानस्य कुञ्जरेन्द्रस्य गर्जतः ।

शब्देन तस्थुरालीय सर्वे संकुचिता गजाः ॥ ६.३१३ ॥

घटोत्कचेन संसक्तं दृष्ट्वा प्राग्ज्योतिषेश्वरम् ।

सह द्रोणादिभिर्वीरैर्भीष्मस्तं देशमाद्रवत् ॥ ६.३१४ ॥

घटोत्कचं कालरूपं नदन्तं वीक्ष्य भैरवम् ।

संध्यायां दुर्जयं मत्वा भीष्मस्तं भीमविक्रमम् ॥ ६.३१५ ॥

अवहारं सुसैन्यानां विदधे धीमतां वरः ।

येनाभवन्कालवक्त्रान्निष्क्रान्ता इव कौरवाः ॥ ६.३१६ ॥

▪ ▪ ▪ ▪ ▪ चतुर्थो युद्धदिवसः ॥ २३ ॥ *****

ततो निशायामभ्येत्य कुरुराजः पितामहम् ।

पप्रच्छ पाण्डुपुत्राणां दुःखितो जयकारणम् ॥ ६.३१७ ॥

तमब्रवीच्छान्तनवो राजन्नुक्तोऽसि सर्वदा ।

देवेन विष्णुना गुप्ता न जेयाः पाण्डवा इति ॥ ६.३१८ ॥

पुरा भूभारशान्त्यर्थं स्वयंभूर्मुनिसंसदि ।

प्रादुर्भूतं स्वयं विष्णुं तुष्टाव सहसां निधिम् ॥ ६.३१९ ॥

जय विश्वेश विश्वात्मन्विश्वक्सेन सुधानिधे ।

अमन्दचिद्घनानन्द संवित्समरसद्युते ॥ ६.३२० ॥

नमस्तुभ्यं जगत्सर्गस्थितिसंहारकारिणे ।

त्रिविक्रमाय महते त्रिगुणाय त्रिमूर्तये ॥ ६.३२१ ॥

नमः प्रचण्डचक्राग्रप्रभाबासुरबाहवे ।

दैत्यान्धकारसंहारकारिणे मोहदारिणे ॥ ६.३२२ ॥

अवतीर्णा भुवं नाथ दानवा ये हतास्त्वया ।

तेषां वधाय दृप्तानां मानुषी तनुमाविश ॥ ६.३२३ ॥

इति स्तुताः पद्मभुवा देवो नारायणः प्रभुः ।

नरेण साकं भूभारशान्त्यै क्षितिमवातरत् ॥ ६.३२४ ॥

स एष कृष्णो भगवाञ्जातो यादवनन्दनः ।

नरश्च विजयो धीरः प्रवरः सर्वधन्विनाम् ॥ ६.३२५ ॥

देवौ कृष्णार्जुनावेतौ न जेयौ त्रिदशैरपि ।

इति ज्ञात्वा शमः पुत्र क्रियतां पाण्डुनन्दनैः ॥ ६.३२६ ॥

- - - - - विश्वेपाख्यानम् ॥ २५ ॥ *****

अथ प्रभाते मकरश्येनव्यूहाग्रवर्तिनः ।

भीष्मभीममुखा युद्धं चक्रिरे पाण्डुनन्दनाः ॥ ६.३२७ ॥

हतानां हन्यमानानां घ्नतां च समरे मिथः ।

पततां तत्र वीराणां निःस्वस्तुमुलोऽभवत् ॥ ६.३२८ ॥

भीमफल्गुणसौभद्रमत्स्यसात्यकिपार्षतैः ।

भीष्ममुख्यैश्च ते सेने भिन्ने संशयमापतुः ॥ ६.३२९ ॥

कबन्धताण्डवश्चण्डे मत्तवेतालसंकुले ।

तस्मिन्नायोधने घोरे भूतानामुत्सवोऽभवत् ॥ ६.३३० ॥

धन्विनां शरजालेन दिवमुत्पततां मुहुः ।

रवौ संछादिते राज्ञां व्यर्थोऽभूच्छस्त्रसंग्रहः ॥ ६.३३१ ॥

बीरेण भूरिश्रवसा संसक्तं वीक्ष्य सात्यकिम् ।

अभ्याद्रवन्धन्विनस्तं देशं सात्यकिसूनवः ॥ ६.३३२ ॥

तेषामापततां पूर्णं सृजतां शरदुर्दिनम् ।

भूरिश्रवाः शिरांस्यारादुश्चकर्त शितैः शरैः ॥ ६.३३३ ॥

हतेषु तेषु कुपितः प्रदीप्तास्त्रो धनंजयः ।

चकार कुरुसेनानां संहारं हरिसारथिः ॥ ६.३३४ ॥

हते लक्षचतुर्भागे भूभुजामनिवर्तिनाम् ।

गाम्डीवधन्वना सैन्यं वासरान्ते न्यवर्तत ॥ ६.३३५ ॥

- - - - - पञ्चमो युद्धदिवसः ॥ २६ ॥ *****

पुनः प्रभाते संनद्धा निर्ययुः कुरुपाण्डवाः ।

अलक्ष्यभेदाव्यूहाभ्यां क्रौञ्चेन मकरेण च ॥ ६.३३६ ॥

ततः प्रमथ्य सहसा भीमसेनोऽरिवाहिनीम् ।

विवेश भृशसंक्रुद्धः समं द्रुपदसूनुना ॥ ६.३३७ ॥

ताभ्यां विदारिते व्यूहे कुपिताः कुरुनन्दनाः ।

विमुखैः कुञ्जरानीकैस्तौ तूर्णं पर्यवारयन् ॥ ६.३३८ ॥

भीमसेनगदाघातनिष्पिष्टवपुषां रणे ।

अभूद्व्यतिकरो घोरः पततां गजयोधिनाम् ॥ ६.३३९ ॥

युध्यमानेषु सैन्येषु भीमेन भुजशालिना ।

अभ्याद्रवत्सानुगस्तं स्वयं राजा सुयोधनः ॥ ६.३४० ॥

छादितं कौरवैर्दृष्ट्वा भीमं विशिखवर्षिभिः ।

विमोहं विदधे तेषां मोहनास्त्रेण पार्षनः ॥ ६.३४१ ॥

द्रोणेन स्वयमभ्येत्य ज्ञानास्त्रेण विनाशिते ।

मोहनास्त्रे कुरुपतिं भीमस्तूर्णमुपाद्रवत् ॥ ६.३४२ ॥

मदान्ध क्वाधुना जीवन्मयि जीवति यास्यसि ।

इत्युक्त्वा ते शरशतैर्वज्रवेगैरवाकिरन् ॥ ६.३४३ ॥

भीमचापच्युतैर्बाणैः सोऽथ कृत्तरथध्वजः ।

हृदि निर्दारितो भेजे मूर्छां व्यथितमानसः ॥ ६.३४४ ॥

अत्रान्तरे भीष्मशरैर्हन्यमानेषु राजसु ।

घोरो बभूव संमर्दः कृतान्तसमरोत्सवः ॥ ६.३४५ ॥

द्रौपदेयेषु वीरेषु युध्यमानेषु कौरवैः ।

अवर्तत रणो घोरो गजवाजिरथक्षयः ॥ ६.३४६ ॥

अथावहारं सैन्यानां चक्रे शन्तनुनन्दनः ।

राजसेवावृते सूर्ये यातेऽस्तं रुधिरारुणे ॥ ६.३४७ ॥

- - - - - षष्ठो युद्धदिवसः ॥ २७ ॥ *****

अन्येद्युर्मण्डलव्यूहे भीष्मेण विहिते स्वयम् ।

युधिष्ठिरः स दुर्भेद्यं वज्रव्यूहमकल्पयत् ॥ ६.३४८ ॥

ततः प्रवृत्ते समरे भीषणे भीष्मपार्थयोः ।

विराट आद्रवद्द्रोणं गरिष्ठं सर्वधन्विनाम् ॥ ६.३४९ ॥

द्रोमस्तं बाणवर्षेण संछाद्य शरवर्षिणम् ।

उन्ननाद धनध्वानो रथमस्य जघान च ॥ ६.३५० ॥

स हताश्वं समुत्सृज्य रथं पुत्रस्य संभ्रमात् ।

आरुरोह हतानीकं शङ्खस्यारूढधन्विनः ॥ ६.३५१ ॥

द्रोणोऽथ तौ पितापुत्रौ विलोक्यैकरथे स्थितौ ।

शङ्खाय प्राहिणोद्घोरं मृत्युदण्डोपमं शरम् ॥ ६.३५२ ॥

स तेन भिन्नहृदयः पपात क्षतजोक्षितः ।

वातेनोन्मथितः शैलादुत्फुल्ल इव किंशुकः ॥ ६.३५३ ॥

ततः शिखण्डिनं द्रोणः शरैर्विशिखवर्षिणम् ।

हताश्वे सात्यकिरथं समारूढे शिखण्डिनि ।

अलम्बुसो राक्षसेन्द्रः क्रूरकर्मा तमाद्रवत् ॥ ६.३५४ ॥

मायया युध्यमानं तं गर्जन्तं राक्षसेश्वरम् ।

चकार विमुखं कोपाद्रौद्रेणास्त्रेण सात्यकिः ॥ ६.३५५ ॥

शैनेयेन जिते तस्मिन्निरावानर्जुनात्मजः ।

विन्दानुविन्दावभ्यायाज्जम्भारिसमविक्रमः ॥ ६.३५६ ॥

घटोत्कचमथायान्तं कृतान्तमिव भैरवम् ।

अवारयद्गजेन्द्रेण भगदत्तो नृपाग्रणीः ॥ ६.३५७ ॥

वीरं स हत्वा हैडम्बं पाण्डवानामनीकिनीम् ।

दर्पाद्विलोडयामास गजेन्द्रो नलिनीमिव ॥ ६.३५८ ॥

माद्रीसुतौ ततः शल्यं विधाय विरथं शरैः ।

चक्रतुर्विमुखं संख्ये राजचक्रस्य पश्यत ॥ ६.३५९ ॥

स्वयं युधिष्ठिरो राजा नृपं जित्वा श्रुतायुधम् ।

विगाह्य कौरवानीकं विदधे विमुखं शरैः ॥ ६.३६० ॥

चेकितानेन विजिते गौतमे धन्विनां गुरौ ।

भीष्मश्चकार कदनं राज्ञामन्यत्र चार्जुनः ॥ ६.३६१ ॥

युधिष्ठिरगिरा वीक्ष्य भीष्माय समभिद्रवत् ।

शिखण्डिनं मद्रराजो दिव्यैरस्त्रैरवारयत् ॥ ६.३६२ ॥

भीष्मेण हन्यमानेषु भूपालेष्वनिवर्तिषु ।

पार्थेन च त्रिगर्तेषु जगामास्तं दिवाकरः ॥ ६.३६३ ॥

तमोभिरावृते लोके रणे रक्तासवाकुले ।

प्रमत्तैरिव वेतालैः शिबिराणि ययुर्नृपाः ॥ ६.३६४ ॥

- - - - - सप्तमो युद्धदिवसः ॥ २८ ॥ *****

भीष्मेण सागरव्यूहे प्रातर्विरचिते पुनः ।

शृङ्गाटकं महाव्यूहं चक्रे द्रुपदनन्दनः ॥ ६.३६५ ॥

विदीर्णेष्विव सैन्येषु भीष्मचापच्युतैः शरैः ।

बभूवाभिमुखः कोपादेक एव वृकोदरः ॥ ६.३६६ ॥

स हत्वा सारथिं बाणैस्तूर्णं शन्तनुजन्मनः ।

द्रोणस्य च समुद्भ्रान्तपताकं विदधे रथम् ॥ ६.३६७ ॥

लब्धलक्ष्यस्ततो भीमः सप्त दुर्योधनानुजान् ।

जघान मदसंरब्धान्पञ्चानन इव द्विपान् ॥ ६.३६८ ॥

बह्वाशिनं कुण्डधारं विशालाक्षं सुदुर्जयम् ।

महोदरं मण्डितकं सुनाभं च निहत्य तान् ॥ ६.३६९ ॥

विद्राव्य कौरवचमूं ननादास्फालयन्दिशः ।

क्षयाय सर्वजगतां देवै रुद्र इवोदितः ॥ ६.३७० ॥

इरावानथ विक्रान्तो विवेश कुरुवाहिनीम् ।

उलूपी नागललना फल्गुनाद्यमजीजनत् ॥ ६.३७१ ॥

कार्यं समारसाहाय्यं स्वयमित्यर्जुनेन सः ।

उक्तः पुरा सुरपुरे तां युद्धभुवमाययौ ॥ ६.३७२ ॥

रत्नकाञ्चनसंनाहैः स पातालतुरङ्गमैः ।

उह्यमानः शरैश्चक्रे फणिलोकमिवापरम् ॥ ६.३७३ ॥

स गत्वा विपुलानीकान्गान्धारान्हययोधिनः ।

शकुनेस्तनयान्सप्त जघान घनविक्रमान् ॥ ६.३७४ ॥

ततो दुर्योधनादिष्टो मायावी राक्षसाधिपः ।

अलम्बुसः समभ्यायादिरावन्तं रणोत्कटः ॥ ६.३७५ ॥

इरावनथ खड्गेन छित्त्वा सपदि रक्षसः ।

स निषङ्गं धनुर्दीप्तं ननाद बलिनां वरः ॥ ६.३७६ ॥

ततो मायां समाश्रित्य महतीं मोहनीं नृणाम् ।

युयुधाते समाविश्य तौ नभो भीमविक्रमौ ॥ ६.३७७ ॥

इरावता निजास्त्रौघैर्हन्यमानस्य रक्षसः ।

घोरः समुदभून्नादः सर्वप्राणिभयंकरः ॥ ६.३७८ ॥

अथ साहाय्यकं चक्रुर्भुजङ्गा भुजगीभुवः ।

तद्वमन्तो विषं तीक्ष्णं भोगान्भोगभृतां वराः ॥ ६.३७९ ॥

राक्षसोऽथ भृशं क्रुद्धो रूपमास्थाय गारुडम् ।

भक्षयित्वाखिलान्सर्पान्भीमं स्वं वपुराददे ॥ ६.३८० ॥

मायाविमोहितस्याथ खड्गेनारादिरावतः ।

जहार राक्षसं कायाच्छिरस्तलकुण्डलम् ॥ ६.३८१ ॥

हते धनंजयसुते हैडम्बः क्रोधमूर्छितः ।

रुराव येन वसुधा चचाल सकुलाचला ॥ ६.३८२ ॥

तमभिद्रुतमालोक्य राजा दुर्योधनः स्वयम् ।

सह सर्वैर्निजानीकैर्महामायमयोधयत् ॥ ६.३८३ ॥

विद्युज्जिह्वं वेगवन्तं महारौद्रं प्रमाथिनम् ।

हैडिम्बानुचरान्घोरान्स जघान निशाचरान् ॥ ६.३८४ ॥

शक्तिं घटोत्कचेनाथ प्रेरितां कुरुभुभूजे ।

महागजेन जग्राह वङ्गानामधिपः पुरः ॥ ६.३८५ ॥

नागे निपतिते तस्मिन्रक्षिते च सुयोधने ।

संहारं पुरुसैन्यानां चकार पिशिताशनः ॥ ६.३८६ ॥

भगदत्तोऽथ विद्राव्य पाण्डवानामनीकिनीम् ।

सुप्रतीकेन नागेन घटोत्कचमयोधयत् ॥ ६.३८७ ॥

तनयं निहतं श्रुत्वा कुपितः शतमन्युजः ।

शिरोभिर्भूमिपालानां दुर्गमां वसुधां व्यधात् ॥ ६.३८८ ॥

भीमोऽपि क्रोधसंतप्तो भ्रातुः पुत्रे निपातिते ।

सुयोधनानुजान्वीरान्प्राहिणोद्यममन्दिरम् ॥ ६.३८९ ॥

अनाधृष्टिं कुण्डलिनं कुण्डभेदिं सुलोचनम् ।

विराटं दीर्घबाहुं च सुबाहुं कनकध्वजम् ॥ ६.३९० ॥

हत्वैतान्कौरवानीकं कबन्धशतसंकुलम् ।

विदधे मत्तवेतालनन्दने दिनसंक्षये ॥ ६.३९१ ॥

विस्रस्तचापकवचे भग्नस्यन्दनकुञ्जरे ।

रणेऽवहारं सैन्यानां ततश्चक्रुर्महारथाः ॥ ६.३९२ ॥

▪ ▪ ▪ ▪ ▪ अष्टमे युद्धदिवसे इरावद्वधः ॥ २९ ॥ *****

ततो निशायामनुजैः सह राजा सुयोधनः ।

कर्ममानाय्य पार्थानां पराभवमचिन्तयत् ॥ ६.३९३ ॥

वैकर्तनस्तमवदत्क्रियतां मद्वचः सखे ।

शस्त्रं न्यासय गाङ्गेयमहं जेष्यामि पाण्डवान् ॥ ६.३९४ ॥

एष वृद्धो निरीहश्च सपक्षश्च धनंजये ।

त्वया न्यस्तोऽतिभारोऽस्मिन्नविचार्यैव केवलम् ॥ ६.३९५ ॥

एतदाकर्ण्य कर्णोक्तं हर्षात्कर्मशतैरिव ।

उत्थाय भीष्मशिबिरं प्रतस्थे भ्रातृभिः सह ॥ ६.३९६ ॥

मणिदीपसहस्रांशुपिङ्गीकृतदिगन्तरः ।

नक्तं दीप्तौषधिवनः सकुलाद्रिरिवाबभौ ॥ ६.३९७ ॥

रत्नकुण्डलकेयूरकिरीटद्युतिनिर्जिताः ।

पुरो निष्प्रतिभा दीपास्तस्यासंल्लज्जिता इव ॥ ६.३९८ ॥

प्रणतान्दृक्त्रिमोदारैः भूमिपालान्विलोकयन् ।

नामभिर्विक्रभागेन सूचितान्वेत्रिमण्डलैः ॥ ६.३९९ ॥

स बभौ गतिलोलेन हारेण तुहिनात्विषा ।

सुधाकल्लोलजालेन पाददारेण मन्मथः ॥ ६.४०० ॥

श्रीमान्संप्राप्य शिबिरं शुभ्रं शन्तनुजन्मनः ।

शयानं रत्नपर्यङ्के प्रणनाम विलोक्य तम् ॥ ६.४०१ ॥

राज्ञेति पूजितस्तेन कृतासनपरिग्रहः ।

दुर्योधनः क्षणं ध्यात्वा पितामहमभाषत ॥ ६.४०२ ॥

अयं जेता भृगुभुवः कार्मुकप्रमयी तव ।

भुजस्त्रैलोक्यविजये पर्याप्त इति मे मतिः ॥ ६.४०३ ॥

कारुण्यादानृशंस्याद्वा रक्ष्यास्ते यदि पाण्डवाः ।

तत्कर्णमनुजानीहि युद्धाय रणकर्कशम् ॥ ६.४०४ ॥

इत्युक्तः कुरुराजेन मर्मणीव समाहतः ।

प्रभाते द्रक्ष्यसीत्युक्त्वा निःश्वसन्क्ष्मामलोकयत् ॥ ६.४०५ ॥

कौरवोऽपि तमामन्त्र्य निजं शिबिरमाययौ ।

दिशः शबलयन्क्षिप्तं दीपदीप्तैर्विभूषणैः ॥ ६.४०६ ॥

अथ प्रभाते भीष्मेण द्रोणद्रौणिमुखैः सह ।

विहिते सर्वतोभद्रे व्यूहे व्यूहाग्रवर्तिना ॥ ६.४०७ ॥

प्रतिव्यूहेष्वनीकेषु नदद्भिः पाण्डुनन्दनैः ।

अभिमन्युः कुरुचमूरग्रे वीरो व्यदारयत् ॥ ६.४०८ ॥

शरांशुशतदुष्प्रेक्ष्यं निदाघार्कमिवोद्यतम् ।

न सेहिरे तं भूपाला मानिनः संहता अपि ॥ ६.४०९ ॥

दुर्योधनप्रेरितोऽथ रक्षःपतिरलम्बुसः ।

तमभ्यधावद्बिभ्राणो मायां त्रैलोक्यमोहिनीम् ॥ ६.४१० ॥

तस्य नादेन महता जगत्प्रलयशंसिना ।

निपेतुः सहसा योधा बहवो विगतासवः ॥ ६.४११ ॥

द्रौपदेयैः पुरः प्राप्तैः स विधाय रणं क्षणम् ।

अभिमन्युरधं बाणैः समं देहमिवाकरोत् ॥ ६.४१२ ॥

शरनिर्दारितेनाथ विहितां तेन रक्षसा ।

सौभद्रस्तामसीं मायां चिच्छेदार्कास्त्रतेजसा ॥ ६.४१३ ॥

अथ द्रौणिप्रभृतिभिः सात्यकिप्रमुखा युधि ।

संसक्ता गगनं चक्रुर्दिव्यास्त्रदहनाकुलम् ॥ ६.४१४ ॥

अर्जुनो द्रोणमभ्येत्य महास्त्रग्रामदुःसहम् ।

वायव्यास्त्रेण विदधे जगतां क्षोक्षविभ्रमम् ॥ ६.४१५ ॥

समुदीर्य च शैलास्त्रं द्रौणेन क्षपितेऽनले ।

धनंजयः कुरुचमूं शरजालैरपूरयत् ॥ ६.४१६ ॥

भीमभीमगदाघातनिर्भिन्ने गजमण्डले ।

सुस्राव शोणितनदी पताकाफेनमालिनी ॥ ६.४१७ ॥

तस्मिन्नाकुलसंग्रामे वर्तमाने भयंकरे ।

वेतालदत्ततालेषु नृत्यत्सु च्छिन्नमूर्धसु ॥ ६.४१८ ॥

भीष्मः पृथुशरज्वालादुःसहः सुभटेन्धनः ।

जज्वाल चापक्रेङ्कारमन्त्रपूत इवानलः ॥ ६.४१९ ॥

तद्भुजप्रेरिताः क्षिप्रं सायका विविशुर्नृपान् ।

विहङ्गा इव सायाह्ने घनच्छायान्महीरुहान् ॥ ६.४२० ॥

खद्योता इव वृक्षेषु शलभा इव शालिषु ।

भीष्मबाणा नरेन्द्रेषु पेतुर्हंसाः सहःस्विव ॥ ६.४२१ ॥

निकृत्तैश्चामरोष्णीषैश्छन्नाश्च पृथिवीभुजाम् ।

चकार समरे भीष्मः स्वयशोविषदा दिशः ॥ ६.४२२ ॥

राज्ञां शिरोभिः पृथिवीमास्तीर्य पुलकोज्ज्वलः ।

रणलक्ष्म्याः स विदधे केलिपद्माकरानिव ॥ ६.४२३ ॥

शिरस्त्रशरनिर्घर्षजाता वह्निकणा बभुः ।

राज्ञां हतानां भीष्मेण जीवा इव नभश्चराः ॥ ६.४२४ ॥

घनेन शरजालेन ग्रस्ता लोकेन सर्वतः ।

स चक्रे सर्वसैन्यानामकण्डरजनीभ्रमम् ॥ ६.४२५ ॥

विदीर्णे पाण्डवबले छिन्नवर्मरथध्वजे ।

गजानीकेषु भग्नेषु भाघशेषेषु राजसु ॥ ६.४२६ ॥

लज्जामुत्सृज्य यातेषु त्यक्तचापेषु केशवः ।

सत्यसंधं रणे भीष्मं जहीत्यर्जुनमब्रवीत् ॥ ६.४२७ ॥

धनंजयोऽथ निःश्वस्य विषण्णवदनाम्बुजः ।

निन्दन्मुहुः क्षत्त्रधर्मं पितामहमुपाद्रवत् ॥ ६.४२८ ॥

दृषद्वा गाण्डीवधन्वानमुद्यतं शरवर्षिणम् ।

बले तूर्णमुपावृत्ते पुनर्युयुधिरे भटाः ॥ ६.४२९ ॥

भीष्मचापच्युतैर्बाणैश्छादितं वीक्ष्य फल्गुणम् ।

रथमुत्सृज्य कंसारिस्तमधावद्भुजायुधः ॥ ६.४३० ॥

विलोक्य कुपितं भीष्मः स्वयं कृष्ममभिद्रुतम् ।

उवाच धन्यतामानी पुलकालंकृताकृतिः ॥ ६.४३१ ॥

पुण्यभाजामहं धुर्यो भगवन्कृतिनां वरः ।

यस्य त्वं जगतां नाथो वधाय स्वयमुद्यतः ॥ ६.४३२ ॥

इति वादिनि गाङ्गेये रथात्तूर्णं धनंजयः ।

अवरुह्य ततः कृष्णमानिनाय रथं पुनः ॥ ६.४३३ ॥

अथार्जुनशरासारैराकीर्णे कुरुकानने ।

पुनः शान्तनवश्चक्रे संहारं पृथिवीभुजाम् ॥ ६.४३४ ॥

घोरे व्यतिकरे तस्मिन्भग्ने सुभटमण्डले ।

अवहारमकुर्वन्त दिनान्ते पाण्डुनन्दनाः ॥ ६.४३५ ॥

▪ ▪ ▪ ▪ ▪ नवमो युद्धदिवसः ॥ ३० ॥ *****

ततो राजन्यां विजने धर्मराजो जनार्दनम् ।

जगाद राजकं दृष्ट्वा भिन्नं भीष्मेण दुःखितः ॥ ६.४३६ ॥

पश्य कृष्ण प्रबुद्धेन गाङ्गेयवडवाग्निना ।

सैन्याम्बुधिरपर्यन्ते मम नीतोऽल्पशेषताम् ॥ ६.४३७ ॥

मण्डलीकृतचापस्य सहस्रांशुशतत्विषः ।

भीष्मस्याखण्डलोप्यग्रे सत्यं परिभावास्पदम् ॥ ६.४३८ ॥

अलं राज्येन मे तावदिति वादिनि धर्मजे ।

उवाच शौरिर्योत्स्येऽहं स्वयं शन्तनुनन्दनम् ॥ ६.४३९ ॥

नाकार्य मे भवत्कार्यमुत्सृष्टसमयोऽधुना ।

पालयामि रणे भीष्मं पश्यतां जगतीभुजाम् ॥ ६.४४० ॥

एतदाकर्ण्य कृष्णोक्तं बभाषे पाण्डवाग्रजः ।

न मिथ्यावादिनं कामात्त्वां कुर्यामहमच्युत ॥ ६.४४१ ॥

जयोपायमितो गत्वा भीष्मं पृच्छामि भूतले ।

स हि मामाशिषा पूर्वं वात्सल्यात्समयोजयत् ॥ ६.४४२ ॥

इति निश्चित्य कृष्णेन भ्रातृभिश्च सहाशु कृत् ।

जगाम भीष्मशिबिरं गूढचारी युधिष्ठिरः ॥ ६.४४३ ॥

स प्रमम्यानुजसखः शौर्यराशिं पितामहम् ।

पप्रच्छ विजयोपायं स च पृष्टस्तमब्रवीत् ॥ ६.४४४ ॥

न तं पश्यामि लोकेषु वीरो मां विजयेत यः ।

जयलाभे च युष्माकं मयि जीवति का कथा ॥ ६.४४५ ॥

न विशस्त्रेन संत्रस्ते न स्त्रीपूर्वे ममेषवः ।

पतन्ति तस्मात्क्लीवेन मां घातय शिखण्डिना ॥ ६.४४६ ॥

उक्ते देवव्रतेनेति लज्जाविनमिताननः ।

अकाम इव दुःखेन ययौ स्वशिबिरं नृपः ॥ ६.४४७ ॥

ततः प्रभाते व्यूहेषु सैन्येषु सुभटैर्मिथः ।

शिखण्डिप्रमुखा वीरा परानीकमुपाद्रवन् ॥ ६.४४८ ॥

ततो भीष्मशरश्रेणीलुलिते राजमण्डले ।

शिखण्डी धुतकोदण्डश्चण्डकोपस्तमभ्यधात् ॥ ६.४४९ ॥

तमब्रवीच्छान्तनवः कामं प्रहर पार्षत ।

ननाम भीष्मविशिखाः पतन्त्यनुजने जने ॥ ६.४५० ॥

इति वादिनमभ्येत्य मण्डलीकृतकार्मुकः ।

शिखण्डी निःश्वसन्कोपादापगेयमभाषत ॥ ६.४५१ ॥

जेतारं भार्गवस्यापि जानामि त्वां महौजसम् ।

युधि युध्यस्व वा मा वा न मे जीवन्गमिष्यसि ॥ ६.४५२ ॥

उक्त्वैतद्बाणजालेन पार्षतः समपूरयत् ।

रक्ष्यमाणः समभ्येत्य पश्चाद्गाण्डीवधन्वना ॥ ६.४५३ ॥

भीष्मोऽपि तमनादृत्य विद्ध्वा कृष्णार्जुनौ शरैः ।

विवेश पाण्डवचमूं राजवेणुवनानलः ॥ ६.४५४ ॥

धृष्टद्युम्नमुखैर्वीरैः कौरवाणां तरस्विनाम् ।

दारुणोऽथ प्रहारोऽभूद्रजःपिहितदिङ्मुखः ॥ ६.४५५ ॥

ततो द्रोणिप्रभृतयो वीरा द्रोणस्य शासनात् ।

रक्षन्तः समरे भीष्मं धनंजयमयोधयन् ॥ ६.४५६ ॥

ततः शान्तनवो राज्ञां शरैरशनिगौरवैः ।

मौलिरत्नांशुशबलं समुन्मथ्य विरोचनम् ॥ ६.४५७ ॥

आक्रीडमिव कालस्य विधाय कदनं रणे ।

अब्रवीत्कूणितमना दूरादेव युधिष्ठिरम् ॥ ६.४५८ ॥

वधाय कुरु कौन्तेय यत्नं मे नृपतिक्षयात् ।

विषण्णोऽहं भृशं पुत्र रौद्रेणानेन कर्मणा ॥ ६.४५९ ॥

इति वादिनि गाङ्गेये शिथिलीकृतकार्मुके ।

सृञ्जयाः सह पाञ्चालैः सोमकैश्च सहाद्रवन् ॥ ६.४६० ॥

ततः कुरुचमूवीराः पाण्डवानां महारथान् ।

आवार्य भीष्मरक्षायै द्वन्द्वं युद्धानि चक्रिरे ॥ ६.४६१ ॥

अथ गाङ्गेयविशिखैरप्रयत्नोज्झितैरपि ।

अवर्तत महारौद्रो राजजीवितसंक्षयः ॥ ६.४६२ ॥

तमभ्यधावदाकर्णाकृष्टकोदण्डलः ।

शिखण्डी खण्डपरशुप्रभावं फल्गुणेरितः ॥ ६.४६३ ॥

स्वयं दुर्योधनेनाथ प्रेरितां वीक्ष्य वाहिनीम् ।

तस्मिन्स्वभटसंहारे वर्तमाने पितामहः ॥ ६.४६४ ॥

उदीर्य घोरं दिव्यास्त्रमभ्यधावद्धनंजयम् ।

अथार्जुनस्याग्रमेत्य शिखण्डिनि पुरःस्थिते ॥ ६.४६५ ॥

विमाना इव गाङ्गेयो महास्त्रं संजहार तत् ।

ब्रह्मलोकाबिकामेषु युध्यमानेषु राजसु ॥ ६.४६६ ॥

वीराणां भीष्मविशिखैरयुतेषु पतत्सु च ।

दारयन्तं परानीकं तमेत्य वसवोऽब्रुवन् ॥ ६.४६७ ॥

भीष्म संन्यासकालोऽयं तवास्मदभिकाङ्क्षितः ।

ततः श्लथोद्यमे तस्मिन्प्रसन्ने भुवनत्रये ॥ ६.४६८ ॥

अर्जुनप्रमुखाः सर्वे सायकैस्तमपूरयन् ।

छिद्यमानेषु बालेषु तस्य तूर्णं किरीटिना ॥ ६.४६९ ॥

शिखण्डी प्राहिणोत्तस्मै हेमपुङ्खशरावलीम् ।

शैखण्डीं शरमालां तां शैरोषीमिव पेशलाम् ॥ ६.४७० ॥

जग्राह प्रहसन्भीष्मः क्षणं स्थगितकार्मुकः ।

दुर्योधनसमादिष्टान्भीष्मस्य रथरक्षिणः ॥ ६.४७१ ॥

मोहयन्बाणजालेन फल्गुणस्तमवाकिरत् ।

विदार्यमाणो नीरन्ध्रैर्गाण्डीवान्निःसृतैः शरैः ॥ ६.४७२ ॥

दुःशासनं पार्श्वगतं भीष्मः सस्मितमब्रवीत् ।

नैते शिखण्डिनो बाणाः शिलासंघातभेदिनः ॥ ६.४७३ ॥

विशन्ति मम मर्माणि बिलं विषधरा इव ।

एते ते वज्रसंस्पर्शा निवातकवचच्छिदः ॥ ६.४७४ ॥

शरीरहारिणो घोराः किरातरणसाक्षिणः ।

इत्युक्त्वा पाण्डुपुत्राय शक्तिं चिक्षेप शक्तिमान् ॥ ६.४७५ ॥

तां च शक्रसुतस्तूर्णं चकार विशिखैस्त्रिधा ।

सर्वायुधेषु च्छिन्नेषु ततो गाण्डीवधन्वना ॥ ६.४७६ ॥

क्षणाद्बभूव दुर्लक्ष्यो भीष्मो निर्विवरैः शरैः ।

युध्यमानेषु वीरेषु भूताविष्टेष्विवाकुलम् ॥ ६.४७७ ॥

दारुमे तुमुले तस्मिन्निर्विभागे बलद्वये ।

अपराह्णे रथाद्भीष्मः सहस्रांशुरिवापरः ॥ ६.४७८ ॥

अस्पृष्टभूमिर्विशिखैः पपात महसां निधिः ।

तस्मिन्निपतिते वीरे केतौ सर्वधनुष्मताम् ॥ ६.४७९ ॥

महतामपि वीराणां हृदयानि चकम्पिरे ।

ततो निवृत्ते संग्रामे हाहाकारे नभःस्पृशि ॥ ६.४८० ॥

दिव्यं भेजे निजं भावमलुप्तात्मा पितामहः ।

आकम्पमाने भुवने वागुवाचाशरीरिणी ॥ ६.४८१ ॥

भीष्म कालं प्रतीक्षस्व योगवानुत्तरायणम् ।

सर्वज्ञ धारय प्राणान्स्वच्छन्दनिधनो हृदि ॥ ६.४८२ ॥

श्रुत्वैतत्परमं योगमाससाद सुरव्रतः ।

ततस्त्रिदशवाहिन्या विसृष्ट हंसरूपिणः ॥ ६.४८३ ॥

तमेवार्थं समभ्येत्य मुनयो भीष्ममब्रुवन् ।

स्थितोऽस्मीति च गाङ्गेयो निगद्य यशसां निधिः ॥ ६.४८४ ॥

इरतल्पे गतः सर्वान्कुरून्भीतानसान्त्वयत् ।

प्रणतानथ संप्राप्तान्पुनः कौरवपाण्डवान् ॥ ६.४८५ ॥

अश्रुपूर्णेक्षणानूचे संभाव्य कुरुपुंगवः ।

धारणं लम्बमानस्य शिरसो मे विधीयताम् ॥ ६.४८६ ॥

श्रुत्वैतदुपधानेषु समानीतेषु राजभिः ।

जग्राह शासनात्तस्य त्रिभिः पार्थः शरैः शिरः ॥ ६.४८७ ॥

भीष्मस्तत्कर्मतुष्टोऽथ प्रशशंस धनंजयम् ।

पाण्डवैः क्रियतां संधिरित्युवाच च कौरवम् ॥ ६.४८८ ॥

- - - - - दशमो युद्धदिवसः ॥ ३१ ॥ *****

ततो रजन्यां यातायामुपाविष्टेषु राजसु ।

सेव्यमानो मुनिजनैर्भीष्मो जलमयाचत ॥ ६.४८९ ॥

मणिकाञ्चनचित्रेषु कलशेष्वमलाम्भसः ।

समानीतेषु भूपालैर्व्यधान्मेघास्त्रमर्जुनः ॥ ६.४९० ॥

तदुद्भूतेन पयसा गाङ्गेयस्तेन तर्पितः ।

नरावतारं प्रीतात्मा सादरं तमपूजयत् ॥ ६.४९१ ॥

महारथेषु यातेषु समामन्त्र्यापगासुतम् ।

कर्णः प्रसादयामास तदभ्यर्च्य कृताञ्जलिः ॥ ६.४९२ ॥

तमुवाच प्रसन्नात्मा वीतमन्युः पितामहः ।

भजस्व पार्थेषु शमं वीरास्ते भ्रातरस्तव ॥ ६.४९३ ॥

वैकर्तनस्तदाकर्ण्य जगाद विनताननः ।

जाने सर्वमवश्यं तु भवितव्यमिदं प्रभो ॥ ६.४९४ ॥

किंतु दुर्योधनस्यार्थे सुहृदो मानकारिणः ।

अनुजानीहि मां तात समराय समुद्यतम् ॥ ६.४९५ ॥

इति ब्रुवाणो भीष्मेण सोऽनुज्ञातो वरूथिनीम् ।

प्रययौ कुरुपुत्राणां रथेन घननादिना ॥ ६.४९६ ॥

अथ कुरुवृषबाणामङ्गराजोत्सुकानां परपरिभवदीक्षाभग्नमानादराणाम् ।

पतिहितमनीकं साम्यमाप द्रुतानां सरयपवनपानीकम्पितानां वनानाम् ॥ ६.४९७ ॥

इति श्रीक्षेमेन्द्रविरचितायां भारतमञ्जर्यां भीष्मपर्व

"https://sa.wikisource.org/w/index.php?title=भारतमञ्जरी/भीष्मपर्व&oldid=101953" इत्यस्माद् पुनः प्राप्तिः

- ३१ जनवरी २०१७ (तमे) दिनाङ्के अन्तिमसम्पादनं ०५:४० समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।